# Nrisimha Samanushthana

# નૃસિંહસામાનુષ્ઠાન

## Document Information

Text title : Nrisimha Samanushthana

File name : nRRisiMhasAmAnuShThAna.itx

Category : vishhnu, dashAvatAra, viShNu

Location : doc_vishhnu

Proofread by : Manoj Kumar Barman

Description/comments : nRRisiMhakosha 3 upAsanA khaNDa uttarArdha

Latest update : August 11, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 11, 2025

*sanskritdocuments.org*

# નૃસિંહસામાનુષ્ઠાન

અથ સામાનુષ્ઠાન પ્રારમ્ભઃ ॥

શ્રીમલ્લક્ષ્મીનૃસિંહાય નમઃ ॥ શ્રીરામ ॥ ઇદમારાધનં ત્રૈકાલમાવશ્યકમ્ ॥ અદ્યેત્યાદિ તિથૌ મમ સમસ્તપાપક્ષયદ્વારા શ્રીપરમેશ્વરપ્રીત્યર્થં પુનઃ સંસારોચ્છેદનપૂર્વકં ઝટિતિ બ્રહ્મ સાક્ષાત્કારપર્યન્તં શ્રીમલ્લક્ષ્મીનૃસિંહચરણપ્રસાદસિધ્યર્થં શ્રીસામરાજાનુષ્ટુપ્ મન્ત્રરાજશ્રૌતવિદ્યતા અન્તર્યાગબહિર્યાગાભ્યાં શ્રીમલ્લક્ષ્મીનૃસિંહં આરાધયિષ્યે ॥ શુચ્યાદિપૂર્વકાજપાદ્યઙ્ગમન્ત્રારાધનમહં કરિષ્યે ॥ ઇતિ સઙ્કલ્પ્ય ॥ એવં વિધાય ॥ અઙ્ગ. મન્ત્રાન્તે ॥ ૐ શ્રીં ક્ષ્રૌં ૐ ઇતિ મૂલવ્યૂહમુચ્ચાર્ય ॥ શ્રીનૃસિંહારાધનારમ્ભે શાન્તિં પઠેત્ ॥ ૐ ભદ્રં કર્ણેભિઃ ઋક્ ॥ સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવા ઋક્ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ તત્રાદૌ તત્ત્વચતુષ્ટયશોધનમ્ ॥ ૐ ઈં હં ઉગ્રં વિષ્ણું હં ઈં ૐ ઐં આત્મતત્ત્વં॥ । ૐ ઈં હં મૃત્યું. મૃત્યું હં હં ઈં ૐ ઐં ક્લીં સૌઃ સર્વત ! ॥ ૐ બ્રહ્માનન્દં પ. ॥ દ્વન્દ્વાતીતમ્ ॥ એકં નિત્યં. ॥ ભાવાતીતં ત્રિગુ ॥ અખણ્ડમણ્ડલા. ॥ તત્પદં દર્શિતં. ॥ હેતવે જગ. ॥ પ્રભવે સર્વ વિદ્યાનાં શં. ॥ ગુરુર્બ્રહ્મા. ॥ ઇતિ ધ્યાત્વા કરશુચિં કુર્યાત્ ॥ અં અં ગુ. । આં તર્જનીભ્યાં નમઃ । સૌઃ મધ્યમાભ્યાં નમઃ । અં અનામિકાભ્યાં નમઃ । આં કનિષ્ઠિકાભ્યાં નમઃ । સૌઃ કરતલકરાઅપૃષ્ઠાભ્યાં નમઃ ॥ મૂલેન પ્રણાયમત્રયં કૃત્વા કૃતાઞ્જલિર્ભૂત્વા ॥ પ્રકૃતિપ્રાકૃતાશેષવિશેષાય દ્વિભૂતયઃ પ્રવિશન્તુ મમાન્તસ્થિતવિષ્ણોશ્ચરણરેણવઃ ॥ સ્વવામભાગે ગું ગુરુભ્યો નમઃ પં પરમગુ. ॥ પં પરમેષ્ઠી પં પરાત્પરગુ. સ્વદક્ષિણે પરમેશ્વરાય । શેષાય નમઃ ॥

ગં ગણપતયે. દું દુર્ગાયૈ. સં સરસ્વત્યૈ. ક્ષં ક્ષેત્રપાલાય । સ્વપુરતઃ તપ્તહાટક કેશાન્ત જ્વલત્પાવકલોચન ॥ વજ્રાધિકનખસ્પર્શ દિવ્યસિંહ નમોસ્તુ તે ઇતિ નૃસિંહં પ્રણમ્ય ॥ સત્યજ્ઞાનેતિ ધ્યાનમ્ ॥ લક્ષ્મીશોભિતવામભાગમમલં સિંહાસને સુન્દરમ્ ॥ સવ્યં ચક્રધરં ચ નિર્ભયકરં વામેન ચાપં વરમ્ ॥ સર્પાધીશકૃતાતપત્રમમલં ત્ર્યક્ષં ભુભુક્ષોરુહમ્ । વન્દે દેવમુનીન્દ્રવન્દિતપદં લક્ષ્મીનૃસિંહં વિભુમ્ ॥ એવં ધ્યાનોક્તં ધ્યાત્વા શ્રીનૃહરિરહમિતિ ભાવયેત્ ॥ કૃતાઞ્જલિઃ પુનર્ભૂત્વા ॥ ૐ અસ્ય શ્રીસામરાજાનુષ્ટુપમન્ત્રરાજ શ્રૌતવિદ્યામન્ત્રસ્ય વિધિઃ પ્રજાપતિર્બ્રહ્મા ઋષિઃ । અનુષ્ટુપ્ છન્દઃ ॥ શ્રીભગવાન્મઙ્ગલેશ્વરઃ શ્રીમલ્લક્ષ્મીનૃસિંહો મહાવિષ્ણુઃ પરમાત્મા દેવતા ॥ નૃ ઇતિ દુષ્ટં કીલકમ્ ॥ સુ ઇત્યદુષ્ટં કીલકમ્ ॥ આદ્યાજગન્મૂલ! પ્રકૃતિઃ શક્તિઃ । તદધિષ્ઠિતઃ પુરુષઃ પરમાત્મા બીજમ્ ॥ બુદ્ધિર્દ્વિતીયા શક્તિઃ ॥ પ્રત્યગાત્મા દ્વિતીયં બીજમ્ ॥ અમૃતપૂરણી મૂલાધારાદારભ્ય બ્રહ્મરન્ધ્રપર્યન્તં સુષુમ્નાનાડી તૃતીયા શક્તિઃ । તત્સહચરણ ઉદાનવાયુસ્તૃતીયં બીજમ્ । ઈં ચતુર્થશક્તિઃ ॥ હં ચતુર્થં બીજમ્ ॥ પરં બ્રહ્મતત્ત્વમ્ ॥ પરમાત્મા ક્ષેત્રમ્ ॥ શ્રુ ક્લીવર્ણઃ ॥ ઉદાત્તરઃ ॥ શ્રીલક્ષ્મીનૃસિંહપ્રીત્યર્થં જપે. ॥ વિધયે પ્રજાપતયે બ્રહ્મણઋષયે નમઃ શિરસિ ॥ અનુષ્ટુપ્ છન્દસે નમઃ મુખે

॥ શ્રીમલ્લક્ષ્મીનૃસિંહો મહાવિષ્ણુઃ પરમાત્મા દેવતાયૈ નમઃ હૃદયે ॥ નૃ ઇતિ દુષ્ટં કીલકાય । દક્ષિણકુક્ષૌ ॥ સુ ઇત્યદુષ્ટં કીલકાય । વામકુક્ષૌ ॥ આદ્યાજગન્મૂલ પ્રકૃતિઃ શક્તયે. વામાંસે ॥ તદધિષ્ઠિતઃ પુરુષઃ પરમાત્મા બીજાય । દક્ષાંસે ॥ બુદ્ધિર્દ્વિતીયા શક્તયે. વામાંસે ॥ પ્રત્યગાત્મા દ્વિતીય બીજાય । દક્ષાંસે ॥ અમૃતપૂરિણી મૂલાધારાદારભ્ય બ્રહ્મરન્ધ્રપર્યન્તં સુષુમ્નાનાડી તૃતીયાશક્તયે. વામાંસે ॥ તત્સહચરણ ઉદાનવાયુસ્તૃતીયં બીજમ્ । દક્ષાંસે ॥ ઇ. ચતુર્થશક્તયે. વામસ્તને ॥ હં ચતુર્થં બીજાય । મુખે ॥ પુનઃ કૃતાઞ્જલિઃ ॥ પરબ્રહ્મતત્ત્વં પરમાત્મા ક્ષેત્રમ્ ॥ શુક્લો વર્ણઃ ॥ ઉદાત્તઃ સ્વરઃ ॥ શ્રીમલ્લક્ષ્મીનૃસિંહચરણ પ્ર. ॥ ૐ ઈં હં ઉગ્રં વિષ્ણું દક્ષિણકર્પરાદઙ્ગુલ્યગ્રપર્યન્તં બહિર્વામહસ્તેન વિન્યસ્ય । જ્વલન્તં. ખમ્ ॥ વામકર્પરાદારભ્ય અગુલ્યગ્રપર્યન્તં બહિર્દક્ષિણ હસ્તેન વિન્યસ્ય ॥ નૃસિંહં. ભદ્રં દક્ષિણ કર્પરાન્તસન્ધરારભ્યાઙ્ગુલ્યગ્રપર્યન્તં વામહસ્તેન વિન્યસ્ય । મૃત્યુમૃત્યું. મ્યહં હં ઈં ૐ તથૈવ વામકરુપરાન્તં સન્ધેરારભ્યાઙ્ગુલ્યાગ્રપર્યન્તં દક્ષહસ્તેન વિન્યસ્ય ॥ હં ઇતિ દક્ષિણકરતલં સ્ફાલયેત્ ॥ હં ઈં ઇતિ વામકરતલં સ્ફાલયેત્ ॥ ૐ ઇતિ કરૌ સમ્પુટયેત્ । ૐ ઈં હં ઉગ્રં વીરં ષ્ણું. હં ઈં ૐ અં શુક્લવર્ણાય આનન્દાત્મને અઙ્ગુષ્ઠા. ॥ ૐ જ્વલન્તં. મુખં ૐ હ્રીં શ્રીં ઘૃણિઃ સૂર્ય આદિત્યઃ શ્રીં ઉં કૃષ્ણવર્ણાય પ્રિયાત્મને તર્જની. ॥ અં નૃસિંહં. ભદ્રં ૐ ભૂર્લક્ષ્મીં સુવઃ કાલકર્ણં તન્નો મહાલક્ષ્મીઃ પ્રચોદયાત્ મં પિઙ્ગલવર્ણાય જ્યોતિરાત્મને મધ્યમા. ॥ ૐ મૃત્યુમ્યહં હં ઈં ૐ ૐ નૃસિંહાય । તન્નૃસિં. ૐ હેમવર્ણાય માયાત્મને પ્રણમામિ. ॥ ૐ ઈં હં ઉગ્રં. મુખમ્ ॥ નૃસિંહં. મ્યહં હં ઈં ૐ ૐ સહસ્રાર હું ફટ્ સર્વવર્ણાય સત્યાત્મને કનિષ્ઠિકા કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥ એવં હૃદયાદિ નેત્રવર્જં પઞ્ચાંઙ્ગન્યાસં કુર્યાત્ ॥ સ્માર્તન્ન્યાસં વિધાયાદૌ પશ્ચાચ્છ્રૌતં સમાશ્રયેદિતિ વચનાત્ શ્રૌન્તન્યાસાસૂર્વયેવ સ્માર્તન્યાસં કુર્યાત્ ॥ ઇતિ સ્માર્તન્યાસઃ ॥ અથ શ્રૌતન્યાસઃ ॥ તતઃ પ્રથમતઃ આત્માનં સङ्કુલીકર્તું દ્વિસ્વરસામ્નાનુષ્ટુભં દ્વે દ્વે અક્ષરે ઉદાત્તાનુત્તાભ્યાં ગાયેત્ ॥ તત્રાદૌ પ્રણવં ગાયેત્ । તથાહિ ॥ અઊ ૩૪૫૬ ઉદાત્તઃ મ ૐ ૩૪૫૬ ભૂ ॥ અનુદાત્ત ॥ અઊ ૩૪૫૬ ઉ. મ ઓ ૩૪૫૬ મૂ ॥ અ. ઇતિ પ્રણવગાનમ્ ॥ ઇં હા ૩૪૫૬ મૂ ઉ. ઈં હા ૩૪૫૬ મૂ અ. ॥ ઈં હ ૩૪૫૬ મૂ ઉ. ઈં હા ૩૪૫૬ મૂ અનુ. ॥ ઇતિ શક્તિબીજે પ્રગાય ॥ ઉગ્રં ૩૪૫૬ મૂ ઉ. વીરં ૩૪૫૬ મૂ અનુદાત્ત ॥ મહા ૩૪૫૬ ઉ. વિષ્ણુ ૩૪૫૬ મૂ અ. ॥ તતઃ પૂર્વવત્પ્રણવં પ્રગાય ॥ જ્વલ ૨૩૪૫ મૂ ઉ. તં સં ૨૩૪૫ અ. ર્વતો ૨૩૪૫ ઉ. મુખ ૨૩૪૫ મૂ અ. ॥ ૐ હ્રીં શ્રીં ઘૃણિઃ સૂર્યાદિત્યઃ શ્રીમ્ ॥ ઇતિ સાવિત્ર મન્ત્રં જપેત્ ॥ ન તુ ગાયેત્ ॥ નૃ સી ૨૩૪૫ મૂ ઉ. હં ભી ૨૩૪૫ અ. ષ ણ ૨૩૪૫ મૂ ઉ. । ભદ્ર ૨૩૪૫ મૂ અ ॥

ૐ ભૂલક્ષ્મી ભુવર્લક્ષ્મીસુવઃ કાલકર્ણ તન્નો મહાલક્ષ્મીઃ પ્રચોદયાત્ ॥ ઇતિ યજુર્લક્ષ્મી મન્ત્રં ગીતરહિતં જપેત્ ॥ મૃત્યૂ ૨૩૪૫ ઉ. મૃત્યૂ ૨૩૪૫ મૂ અ. ॥ ન મા ૨૩૪૫ ઉ. મ્ય હ ૨૩૪૫ મૂ અ. ॥ તતઃ ૐ નૃસિંહાય વિ. ॥ તં નૃસિં. ત્ ઇતિ ઉલ્કા ગાયેત્ ॥ યથા ૐ નૃ ૨૩૪૫ ઉ. સિંહા ૨૩૪૫ અ. । ય વી ૨૩૪૫ ઉ. ધ્મહે ૨૩૪૫ અ. । વજ ૨૩૪૫ ઉ । નખા ૨૩૪૫ અ વ ય ધી ૨૩૪૫ ઉ. મહી ૨૩૪૫ અ. । તન્નઃ ૨૩૪૫ ઉ. । સિંહઃ ૨૩૪૫ અ. । પ્રચો ૨૩૪૫ ઉ. દ યા ૨૩૪૫ ત્ અ. ॥ તતો મિશ્રણસામ ॥ યથા ઇ મ ૨૩૪૫ ઉ. । હં ઉ ૨૩૪૫ અ. । ઈં મ ૨૩૪૫ ઉ. । હં ૐ ૨૩૪૫ ◌ં અ. । તતઃ સામરાજાત્મકોહં ઇતિ પરિભાવ્ય ॥ આત્માનં સકલીકૃતિં ભાવયિત્વા અનેન સામ્ના ન્યાસેન મમ વ્યાપકો ન્યાસઃ સમ્પાદ્યતામ્ ॥ ઇતિ સર્વાઙ્ગેષુ વ્યાપકં કુર્યાત્ ॥ તતઃ અઙ્ગુષ્ઠાગ્રેણ તર્જનીમધ્યપર્વસ્પૃશતા અઙ્ગુષ્ઠાગ્રેણ કનિષ્ઠિકામૂલપર્વસ્પર્શેન ઉદાત્તાનુદાત્તાભ્યાં મુખહસ્તાભ્યાં ગાયેત્ ॥ અ ઊ ૨૩૪૫ ઉ. । મ ૐ ૨૩૪૫ મ અ । અ

ઊ ૨૩૪૫ ઉ. । ◌ં ૐ ૨૩૪૫ મ અ. ॥ ઇતિ પ્રણવમ્ ॥ ઈં હં ૨૩૪૫ ◌ં ઉ. । ઈં હ ૨૩૪૫ ◌ં ઇતિ શક્તિ બીજે ॥ ઉગ્ર ૨૩૪૫ ◌ં ઉ. વીર ૨૩૪૫ ◌ં અ. । મહા ૨૩૪૫ ઉ. । વિષ્ણુ ૨૩૪૫ મ્. અ. । પુનઃ પ્રણવં પ્રગાય અં શ્વેતવર્ણાય । અઙ્ગુષ્ઠા. ॥ દ્વિતીયપાદં ગાયેત્ ॥ ૐ ઈં હં જ્વલ ૨૩૪૫ ◌ં ઉ. । તં સ ૨૩૪૫ અ. । ર્વતો ૨૩૪૫ ઉ. । મુખા ૨૩૪૫ ◌ં અ. ॥ ૐ હ્રીં શ્રીં ઘૃણિઃ સૂ. શ્રીં ઉં કૃષ્ણવર્ણાય ત્રિ. તર્જ. ॥ ૐ ઈં હં નૃસી ૨૩૪૫ ◌ં ઉ. । હં ભી ૨૩૪૫ અ. ષણ ૨૩૪૫ ◌ં ઉ. । ભદ્ર ૨૩૪૫ ◌ં અ. ॥ ૐ ભૂર્લક્ષ્મી ભુવર્લક્ષ્મી. યા ત્ મં પિઙ્ગલ વર્ણાય જ્યોતિ. । મધ્યમા. ॥ ૐ ઈં હં મૃત્યૂ ૨૩૪૫ ઉ. મૃત્યૂ ૨૩૪૫ ◌ં અ. ॥ નમા ૨૩૪૫ ઉ. । મ્યહ ૨૩૪૫ ◌ં અ. ॥ ૐ નૃ ૨૩૪૫ અ. । ય ધી ૨૩૪૫ ઉ. । મહી ૨૩૪૫ અ. । તન્જઃ ૨૩૪૫ ઉ. । સિંહઃ ૨૩૪૫ અ. । પ્રચો ૨૩૪૫ ઉ. દયા ૨૩૪૫ ત્ અ. ॥ મિશ્રણસામ ॥ ઇમા ૨૩૪૫ ઉ. । હં ઉ ૨૩૪૫ અ. । ઈં મા ૨૩૪૫ ઉ. ॥ હં ૐ ૨૩૪૫ મ અ. । ૐ હેમવર્ણાય માયા. અનામિ । અ ઊ । મ ૐ મ્ । અઊ । મૐ મ્ ॥ ઇતિ પ્રણવમ્ । ઇં હમ્ । ઈં હામ્ । ઈં હ મ્ । ઈં હામ્ ॥ ઇતિ શક્તિબીજે ॥ ઉગ્રમ્ । વીરમ્ । મહા । વિષ્ણુમ્ । પુનઃ પ્રણવં ચ પ્રગાય ॥ ૐ ઈં હં જ્વલમ્ । તં સ । ર્વતો । મુખમ્ ॥ ૐ હ્રીં શ્રીં ઘૃ. શ્રીં ૐ વિદ્યુદ્વર્ણાય જ્ઞાના । કનિષ્ઠિ ॥ । ઉભય કનિષ્ઠિકયોર્નખધ્વનિં કુર્યાદિતિ સામ્પ્રદાયઃ ૐ ઈં હં નૃસીમ્ । હં ભી । ષણામ્ । ભદ્રામ્ । ૐ ભૂર્લક્ષ્મી ભુવ. દયાત્ ॥ ૐ ઈં હં મૃત્યૂમ્ । મૃત્યુમ્ । નમા । મ્યહમ્ ॥ નૃસિંહગાયત્રીં ગીત્વા મિશ્રણસામં ચ ગીત્વા ૐ સર્વવર્ણાય સત્યા. કરતલ ઇતિ દ્વિસ્વરાનુષ્ટુપ્ સામવિધિઃ ॥ અથ ષટ્સ્વરગાનલક્ષણમાહ ॥ ઔદાત્તઘદ્વયમત્ર કૃત્વા નીચૈસ્તૃતીયં ત્વથ ચતુર્થપઞ્ચમે ॥ સ્વરેણ મધ્યે ન પુનસ્તુ ષષ્ઠસુચ્ચૈરનુચ્ચૈર્મુનિપર્વતાક્ષરૈઃ ॥ ૧॥ અત્ર ચાઙ્ગુષ્ઠોત્તમપર્વણ ઉચ્છ્રીભાવેનૈકમ્ । વક્રીભાવેનૈકમ્ ॥ તર્જનીમધ્યમોપકનિષ્ઠિકામધ્યપર્વસ્પર્શૈસ્ત્રીન્કનિષ્ઠિકામધ્યપર્વસ્પર્શેન અપરં તન્મૂલપર્વસ્પર્શેન અપરમિત્યુચ્ચમારભ્ય તન્ત્રનીચક્રમેણ સપ્તસ્વરાનુક્વાભાષ્યકારેણ નિમ્બાદિત્યસ્વામિ ભિશ્રોક્તમ્ ॥ તચ્ચ । આદ્યં અક્ષરદ્વયં તત્ત્વસ્તાઙ્ગુષ્ઠોત્તમ પર્વોચ્છ્રયેણ ॥ તૃતીયતમક્ષરં કનિષ્ઠિકામૂલપર્વસ્પર્શેન ચતુર્થપઞ્ચમં ચ એકૈકમક્ષરં પૃથક્પૃથક્ અઙ્ગુષ્ઠેન તર્જન્યાસ્પર્શેન તત્સહિતાઙ્ગુલ્યા મધ્યમાયા ઉપકનિષ્ઠિકાયાઃ કનિષ્ઠિકાયાશ્ચ ક્રમેણ મધ્યપર્વસ્પર્શેન ષષ્ઠમઙ્ગુષ્ઠોત્તમપર્વછ્રયેણ ॥ સપ્તમાષ્ટમાક્ષરે મિલિતે કનિષ્ઠિકામૂલપર્વસ્પર્શેન મુખેન ચ પ્રગાય ॥ અત્ર ષટ્સ્વરગાન કાલદીર્ઘાક્ષરાણિ વામાઙ્ગુલિભિર્ગૃહ્ણીયાત્ ઇત્યેવં યથાવિહિતસ્વરૈર્ગાયેત્ ॥ ઇતિ ષટ્સ્વરસામલક્ષણમ્ ॥ અથ ષટ્સ્વરેણ સામ્ના પઞ્ચાઙ્ગોપાસ્તિરુચ્યતે ॥ ગાનપ્રકારશ્ચૈવમ્ ॥ ૐ ऽऽऽ । ऽऽऽ । ऽऽऽ । મ્ ॥ અ ઊ ૩૪૫૬ ઉ. મ ૩૪૫૬ અ. । ૐ ૩૪૫૬ મધ્યમ । અ ૩૪૫૬ મ. । ઊ ૩૪૫૬ ઉ. । મ ૐ ૩૪૫૬ ◌ં અ. ॥ ઇતિ પ્રણવગાનમ્ ॥ ઇ હ ૩૪૫૬ મ ઉ. । ઈં ૩૪૫૬ અ. હં ૩૪૫૬ મ્ । મ્. । ઈં ૩૪૫૬ મ. । હ ૩૪૫૬ મ્ ॥ ઉ. । ઈં હ ૩૪૫૬ ◌ં અ । ઇતિ શક્તિબીજે પ્રગાય ॥ અથ પ્રથમપાદ તૃતીયષષ્ઠાક્ષરગ્રહણસહિતં પ્રગાય યથા ॥ ઉગ્ર ૩૪૫૬ ◌ં ઉ. । વી ૩૪૫૬ અ. । રં ૩૪૫૬ મ. । મ ૩૪૫૬ મ. । હ ૩૪૫૬ ઉ. । વિષ્ણુ ૩૪૫૬ ◌ં અ । ઇતિ ગીત્વા ॥ અ ઊ ઉ. । મા અ. । ૐ મ્ । મ. અ । મ. । ઉ । ઉ. । મ ૐ મ અ. । ઇતિ પ્રણવષટ્સ્વરેણ ગીત્વા ॥ હદિ કરં નિધાય ॥ ઓંસ સાગરાં સપર્વતાં સપ્તદ્વીપાં વસુન્ધરામ્ ॥ ઇતિ પૃથ્વીલોકાત્મકત્વં મન્ત્રસામ્નોરાદિ પાદસ્ય પરમેશ્વરં હૃદયસ્થં ચ ભાવયિત્વા ॥ અગ્નિર્વૈદેવા ઇદં સઁર્વવિશ્વાભૂતાનિ પ્રાણા વા ઇન્દ્રિયાણિ પશવોન્નમમૃતઁ્ સંરાટ્ સ્વરાટ્ વિરાટ્ ॥ ઇતિ અગ્ન્યાત્મકત્વં પરિભાવ્ય ॥ તસ્ય હ વૈ પ્રણવસ્ય યા પૂર્વા માત્રા પૃથિવ્યકારઃ સ ઋગ્ભિઋવિદો બ્રહ્માવસવોગાયત્રીગાર્હપત્યઃ ॥ ઇતિ પ્રણવમાત્રા ગર્હપત્યાત્મકતાં ચ પરિભાવ્ય ॥ સોઽયમાત્મા ચતુષ્પાજ્જાગરિતસ્થાનો બહિઃ પ્રજ્ઞઃ સત્પાઙ્ગ

એકોનવિંશતિમુખસ્થૂલભુગ્વૈશ્વાનરઃ પ્રથમઃ પાદઃ ॥ ઇતિ જાગૃદવસ્થા વિશ્વાત્મકં પરિભાવ્ય ॥

ૐ ઈ હં ઉગ્રં. વિષ્ણું ૐ અશ્રુક્લવ હૃદયા. ॥ તતો દ્વિતીયપાદં ષષ્ઠાક્ષરગ્રહણસહિતં ષટ્ સ્વરેણ ગાયેત્ ॥ યથા । જ્વલ ૩૪૫૬ ઁ ઉ । ત ૩૪૫૬ ઁ અ । સ ૩૪૫૬ મ । ર્વ ૩૪૫૬ મ. । તો ૩૪૫૬ ઉ. । મુખ ૩૪૫૬ ઁ અ ॥ ઇતિ ગીત્વા શિરસિ પલ્લવાકૃતિં કરં નિધાય । યક્ષગન્ધર્વાપ્સરોગણૈઃ સેવિતમન્તરિક્ષમ્ ॥ ઇતિ અન્તરિક્ષલોકાત્મકત્વં સ્વશિરસિ પરિભાવ્ય ॥ ઋગ્યજુઃ સામાથર્વરૂપઃ સૂર્યોત્તરાદિત્યે હિરણમયઃ પુરુષઃ ॥ ઇતિ સૂર્યાત્મતાં પરિભાવ્ય ॥ દ્વિતીયાન્તરિક્ષસૌકારઃ સ યજુભિર્યજુર્વેદો વિષ્ણુરુદ્રાસ્ત્રિષ્ટુપ્ દક્ષિણાગ્નિઃ ॥ ઇતિ તારદ્વિતીયમાત્રાં દક્ષિણાગ્નિરૂપતાઞ્ચ પરિભાવ્ય ॥ સ્વપ્નસ્થાનાન્તઃ પ્રજ્ઞઃ સપ્તાંઙ્ગએકોન વિંશતિમુખઃ પ્રવિવિક્તભુક્તૈજસો દ્વિતીયઃ પાદઃ ॥ ઇતિ સ્વપ્નાવસ્થાં તૈજસાત્મકતાં ચ પરિભાવ્ય ॥ જ્વલન્તં. ખં ૐ હ્રીં શ્રીં ધૃ ત્યઃ શ્રીં ઊં કૃષ્ણવર્ણાં. શિરસે. ॥ સ ઈ પાહિયઋજીષીતરુત્રઃ ॥ શ્રિયં લક્ષ્મીમૌપલામામ્બિકાં ગામ્ ॥ ષષ્ઠીં ચ યામિન્દ્રસેનેત્યુતાપ્યાહુસ્તાં વિદ્યાં બ્રહ્મયોનિઁસરૂપાં તામિહાયુષે શરણમહં પ્રપદ્યે ॥ ઇતિ શ્રિયાદિ સપ્તભિઃ શક્તિભિરભિષિચ્યમાનં ઈશ્વરશિરોઙ્ગં ભાવયેત્ ॥ અથ દ્વિતીય-ચતુર્થાક્ષરગ્રહણસહિતં તૃતીયપાદં ગાયેત્ ॥ નૃસી ૩૪૫૬ ઁ ઉ. । હ ૩૪૫૬ ઁ અ । ભી ૩૪૫૬ મ. । ષ ૩૪૫૬ મ. । ણ ૩૪૫૬ ઁ ઉ. । ભદ્ર ૩૪૫૬ ઁ અ. ॥ ઇતિ ષટ્સ્વરેણ ગીત્વા શિખાયામાબધ્વમુષ્ટિમઙ્ગુષ્ઠં નીત્વા ॥ રસુરુદ્રાદિત્યતૈઃ સર્વૈ દેવૈઃ સેવિતં દિવમ્ ॥ ઇતિ દ્યુલોકાત્મકતાં સામાનુષ્ટુપ્ તૃતીયપાદસ્ય પરમેશ્વરશિખાં ચ પરિભાવ્ય ॥ ૐ ઔષધીનાં પ્રભવતિ તારાપતિઃ સોમઃ ॥ ઇતિ સોમાત્મકતાં વિભાવ્ય ॥ તૃતીયા દ્યૌઃ સ મકારઃ સસામભિઃ સામવેદો રુદ્રાદિત્યાજગત્યા હવનીયઃ ॥ ઇતિ તારતૃતીય માત્રામાહવનીયાત્મકતાં ચ પરિભાવ્ય ॥ યત્ર સુત્પો ન કઞ્ચન કામં કામયતે ન કઞ્ચન સ્વપ્નં પશ્યતિ તત્સુષુપ્તં સુષુપ્તસ્થાનએકીભૂતઃ પ્રજ્ઞાનઘન એવાનન્દમયોહ્યાનન્દભુક્ ચેતોમુખઃ પ્રાજ્ઞસ્તૃતીયઃ પાદ્ એષ સર્વેશ્વર એવ સર્વજ્ઞ એષોન્તર્યામ્યેષ યોનિઃ સર્વસ્ય પ્રભવાપ્યયૌહિ ભૂતાનામ્ ॥ ઇતિ સુષુપ્તાવસ્થાં પ્રાજ્ઞાત્મતાં ચ પરિભાવ્ય ॥ નૃસિ. ભદ્રં ૐ ભૂર્લક્ષ્મી દયાત્ । મં પિઙ્ગલવર્ણાય । શિખાયૈ વષટ્ ॥ તતઃ દ્વિતીય ચતુર્થાક્ષર-ગ્રહણસહિતં ચતુર્થપાદં નૃસિંહગાયત્રીમિશ્રણસામં ચ ગાયેત્ ॥ મૃત્યૂ ૩૪૫૬ ઉ. । મૃ ૩૪૫૬ અ ॥ ત્યુ ૩૪૫૬ મ્ । મ. । ન ૩૪૫૬ મ. । મા ૩૪૫૬ ઉ. । મ્યહ ૩૪૫૬ ઁ અ. ॥ અથ નૃસિંહગાયત્રી ॥ ૐ નૃ ૩૪૫૬ ઉ. । સિં ૩૪૫૬ અ. । હા ૩૪૫૬ મ. । ય ૩૪૫૬ વી ૩૪૫૬ ઉ. । દ્મ હે ૩૪૫૬ અ. । વજ ૩૪૫૬ ઉ. । ન ૩૪૫૬ અ. । ખા ૩૪૫૬ મ. । ય ૩૪૫૬ મ. । ધી ૩૪૫૬ ઉ. । મહિ ૩૪૫૬ અ. । તન્નઃ ૩૪૫૬ ઉ. । સિં ૩૪૫૬ અ. । હઃ ૩૪૫૬ મ. । પ્ર ૩૪૫૬ મ. । ચો ૩૪૫૬ ઉ. । દયા ૩૪૫૬ ત્ અ. । અથ મિશ્રણસામ ॥ ઇમા ૩૪૫૬ ઉ. । હં ૩૪૫૬ં અ. । ઉ ૩૪૫૬ મ. । ઈં ૩૪૫૬ ઁ મ. । મા ૩૪૫૬ ઉ. । હં ૐ ૩૪૫૬ મ અ. । ઇતિ ગીત્વા ॥ હસ્તૌ સ્કન્ધયોર્નિધાય ॥ બ્રહ્મસ્વરૂપં નિરઞ્જનં પરમવ્યોમ્નિકમ્ ॥ ઇતિ બ્રહ્મસ્વરૂપમમિતિ બ્રહ્મલોકઃ ॥ સામાનુષ્ટુપ્ ચતુર્થપાદસ્થ પરમેશ્વરસ્ય ચ બ્રહ્મલોકાત્મકતાં પરિભાવ્ય ॥ સ બ્રહ્મા સ શિવઃ સ હરિઃ સ ઇન્દ્રઃ સોગ્નિઃ સોક્ષઃ પરમઃ સ્વરાટ્ ॥ ઇતિ પરમાત્મતાં પરિભાવ્ય ॥ યાવસાનેસ્ય ચતુર્થ્યર્દ્ધમાત્રા સા સામલોક ૐ કારઃ સા અથર્વણૈર્મત્રૈરથર્વવેદઃ સંવર્ત્તકોગ્નિર્મરૂતો વિરાડેકઋષિર્ભાસ્વતી સ્મૃતા ॥ ઇતિ પ્રણવાર્દ્ધતુરીયમાત્રાં સંવર્ત્તકોગ્નિરૂપતાઞ્ચ પરિભાવ્યઃ ॥ ન બહિઃપ્રજ્ઞં નાન્તઃ પ્રજ્ઞમ્ । નોભયતઃ પ્રજ્ઞં ન પ્રજ્ઞં નાપ્રજ્ઞં ન પ્રજ્ઞાનઘનમહષ્ટમવ્યવહાર્યમાનાહ્યમલક્ષણમ-ચિન્ત્યમવ્યપદેશ્યસેકાત્મપ્રત્યયસારં પ્રપઞ્ચોપશમં શિવમદ્વૈતં તચ્ચતુર્થમન્યન્તે સ આત્મસવિજ્ઞેયઃ ॥ ઇતિ તુર્યાવસ્થાં મન્ત્રસામ્નોશ્ચતુર્થપાદસ્ય પરમેશ્વરકવચસ્ય ચ

ભાવયિત્વા ॥ ૐ મૃત્યું મૃત્યું. હં હં ઈ ૐ ૐ નૃસિંહા. ॥ તન્નૃસિં. ત્ ॥ ૐ હેમવર્ણા । નેકવચા. ॥ ઇતિ હસ્તાભ્યાં કવચન્યસેત્ ॥ ચત્વારો વેદાઃ સાઙ્ગાઃ સશાખાશ્ચત્વારઃ પાદાશ્ચત્વાર્યઙ્ગાનિ ભવન્તિ સપ્રણવં સર્વં પઞ્ચમં ભવતિ ॥ અથ પ્રત્યક્ ચૈતન્યં મહાચક્રાખ્યં પઞ્ચમમસ્ત્રાઙ્ગમુચ્યતે ॥ તતો મન્ત્રસામ્રોશ્ચરણચતુષ્ટયરૂપત્વેન પરમેશ્વરસ્ય ચ અસ્ત્રરૂપતયા ભાવયેત્ ॥ અથાદૌ શ્રીનૃસિંહસ્ય નાક્ષ્યામેવ ઉત્તરાધરભાવેન સ્થિતં ક્ષીરસાગરમધ્યોલ્લાસિ શ્વેત-દ્વીપસ્થં મહાચક્રં ધ્યાયેત્ ॥ ષડરં વા એતત્સુદર્શનં મહાચક્રં તસ્માત્ષડરં ભવતિ ષટ્ પત્રં ચક્રં ભવતિ ષડ્ વા ઋતવડ ઋતુભિઃ સમ્મિતં ભવતિ મધ્યે નાભિર્ભવતિ નાભ્યાં વા એતે અરાઃ પ્રતિષ્ઠિતા ભવન્તિ માયયા વા એતત્સર્વં વેષ્ટિતં ભવતિ નાત્માનં માયયા સ્પૃશતિ તસ્માન્માયયા બહિર્વેષ્ટિતં ભવતિ ॥ યદેતચ્ચક્રં સુદર્શનં મહાચક્રં તસ્ય મધ્યે નાભ્યાન્તારકં ભવતિ યદક્ષરં નારસિંહમેકાક્ષરં તદ્ભવતિ ષટ્ સુપત્રેષુ ષડક્ષરં સુદર્શનં ભવતિ અષ્ટપત્રેષ્વષ્ટાક્ષરં નારાયણં ભવતિ દ્વાદશસુપત્રેષુ દ્વાદશાક્ષરં વાસુદેવં ભવતિ ષોડશપત્રેષુ માતૃકાદ્યાઃ સબિન્દુકાઃ ષોડશસ્વરા ભવન્તિ દ્વાત્રિંશત્સુપત્રેષુ દ્વાત્રિંશદક્ષરં મન્ત્રરાજં નારસિંહમાનુષ્ટુભં ભવતિ તદ્વા એતન્મહાચક્રં સાર્વકામિકં મોક્ષદ્વારં ઋ ઉન્મયં યજુર્મયં સામમયં બ્રહ્મયમમૃતમયં ભવતિ ॥ તસ્ય પુરસ્તાદ્વસવ આસતે રુદ્રા દક્ષિણન્તં આદિત્યાઃ પશ્ચાદ્વિશ્વેદેવા ઉત્તરતો બ્રહ્મવિષ્ણુમહેશ્વરાભ્યાં સૂર્યાચન્દ્રમસૌ પાર્શ્વયોતદેતદૃચાભ્યુક્તમ્ ॥ ઋચો અક્ષરે ॥ યસ્તં નવે. સતે ॥ સિંહાસનોદ્યચ્છેષાસનાસીનસ્ય તત્ફણામસ્તકસ્ય શ્રીનૃસિંહસ્ય પુરતઃ ઈશાનતઃ કરસંજ્ઞાયા અષ્ટૌ વસવો ન્યસ્તવ્યાઃ ॥ કન્ધ્રુક્ય વસવે નૃસિંહાય નમઃ ॥ ખન્ધરાય વસવે નૃસિંહાય નમઃ ગં સોમાય વસવે નૃસિંહાય નમઃ ॥ ઘં આપાય વસવે નૃસિંહાય નમઃ ॥ ઙં અનિલાય વસવે નૃસિંહાય નમઃ ॥ ચં નલાય વસવે નૃસિંહાય નમઃ ॥ છં પ્રત્યુષાય વસવે નૃસિંહાય નમઃ ॥ જં પ્રભાસાય વસવે નૃસિંહાય નમઃ ॥ ઇતિ વસવો ન્યસ્તવ્યાઃ ॥ ઝં વીરભદ્રાય રુદ્રાય નૃસિંહાય નમઃ ॥ ઞં શમ્ભવે રુદ્રાય નૃસિંહાય નમઃ ॥ ટં ગિરીશાય રુદ્રાય નૃસિંહાય નમઃ ॥ ઠં અજૈકપદાય રુદ્રાય નૃસિંહાય નમઃ ॥ ડં અહિર્બુધ્ન્યાય રુદ્રાય નૃસિંહાય નમઃ ॥ ઢં પિનાકિને રુદ્રાય નૃસિંહાય નમઃ । ણં અપરાજિતાય રુદ્રાય નૃસિંહાય નમઃ ॥ તં ભુવનાધીશાય રુદ્રાય નૃસિંહાય નમઃ ॥ થં કપાલિને રુદ્રાય નૃસિંહાય નમઃ ॥ દં સ્થાણવે રુદ્રાય નૃસિંહાય નમઃ ॥ ધં ભવાય રુદ્રાય નૃસિંહાય નમઃ ॥ ઇતિ દક્ષિણતો એકાદશ રુદ્રાન્વિન્યસ્ય ॥ નં ધાત્રે સૂર્યાય નૃસિંહાય નમઃ ॥ પં અર્યમણે સૂર્યાય નૃસિંહાય નમઃ ॥ ફં મિત્રાય સૂર્યાય નૃસિંહાય નમઃ ॥ બં વરુણાય સૂર્યાય નૃસિંહાય નમઃ ॥ ભં અંશવે સૂર્યાય નૃસિંહાય નમઃ ॥ મં ખગાય સૂર્યાય નૃસિંહાય નમઃ ॥ યં ઇન્દ્રાય સૂર્યાય નૃસિંહાય નમઃ ॥ રં વિવસ્વતે સૂર્યાય નૃસિંહાય નમઃ ॥ લં પૂષ્ણે સૂર્યાય નૃસિંહાય નમઃ ॥ વં પર્જન્યાય સૂર્યાય નૃસિંહાય નમઃ ॥ શં ત્વષ્ટ્રે સૂર્યાય નૃસિંહાય નમઃ ॥ ષં વિષ્ણવે સૂર્યાય નૃસિંહાય નમઃ ॥ ઇત્યાદિત્યાઃ પશ્ચાન્યસ્તવ્યાઃ ॥ વૈશ્વદેવેષુ ળં ક્ષમિતિ વિન્યસેત્ ॥ ળં ક્ષં ઋતુદક્ષસંજ્ઞકેભ્યો વિશ્વેભ્યો દેવેભ્યઃ શ્રીનૃસિંહાય નમઃ । ળં ક્ષં ધુરિ લોચનસંજ્ઞકેભ્યો વિશ્વેભ્યો દેવેભ્યઃ શ્રી નૃસિંહાય નમઃ ॥ ળં ક્ષં પુરૂરવાર્દ્રવસંજ્ઞકેભ્યો વિશ્વેભ્યો દેવેભ્યઃ શ્રીનૃસિંહાય નમઃ ॥ ળં ક્ષં કામકાલસંજ્ઞકેભ્યો વિશ્વેભ્યો દેવેભ્યઃ શ્રીનૃસિંહાય નમઃ ॥ ઇતિ વિશ્વેદેવા ઉત્તરતો ન્યસ્તવ્યાઃ ॥ સવ્યપાર્શ્વહં સૂર્યાય નૃસિંહાય નમઃ ॥ દક્ષિણપાર્શ્વે સંસોમાય નૃસિંહાય નમઃ ॥ દક્ષિણે નૈરૃત્યાં ગં ગણપતયે નૃસિંહાય નમઃ ॥ વામે ઈશાન્યાં હ્રિં ભુવનેશ્વર્યૈ નૃસિંહાય નમઃ ॥ નાભ્યાં તારમામ્ના વિન્યસ્ય ॥ તત્ર બ્રહ્માવિષ્ણુમહેશ્વરાન્વિન્યસેત્ ॥ ૐ બ્રહ્મણે નૃસિંહાય નમઃ ॥ ઉં વિષ્ણવે નૃસિંહાય નમઃ ॥ મં મહેશ્વરાય નૃસિંહાય નમઃ ॥ ઇતિ વિન્યસ્ય । એતત્સર્વં નાભ્યામેવ ॥ યથા ॥ ૐ શ્રીં ક્ષ્રૌં ૐ ઇતિ વિન્યસ્ય ॥ એતચ્ચક્રે ઈશાનાદિ દિગ્દલક્રમેણ સર્વત્ર સાલઙ્કારાઃ સુદર્શનાદિ મૂર્તીર્વિન્યસ્ય ચિન્તયેયુઃ ॥ તથા હિ ॥ સં સુદર્શનાય નૃસિંહાય

નમઃ ॥ હં સુદર્શનાય નૃસિંહાય નમઃ । સ્રાં સુદર્શનાય નૃસિંહાય નમઃ ॥ રં સુદર્શનાય નૃસિંહાય નમઃ ॥ હું સુદર્શનાય નૃસિંહાય । ફટ્ સુદર્શનાય નૃસિંહાય । એતચ્ચક્રસ્થં અસઃ પત્રાણિ ચક્રતવ ઇતિ બુધ્યા ઈમિત્યન્તર્માયયા વેષ્ટયેદિતિ ધ્યાતવ્યમ્ ॥

અથ્વષ્ટ પત્રેષુ ૐ નારાયણાય નૃસિંહાય નમઃ । નં નારાયણાય નૃસિંહાય નમઃ । મોં નારાયણાય નૃસિંહાય નમઃ । નાં નારાયણાય નૃસિંહાય નમઃ । રાં નારાયણાય નૃસિંહાય નમઃ । યં નારાયણાય નૃસિંહાય નમઃ । ણાં નારાયણાય નૃસિંહાય નમઃ । યં નારાયણાય નૃસિંહાય નમઃ । એતચ્ચક્રસ્ય અરાન્વેન્દબુધ્યાપત્રાણિ ગાયત્રી છન્દો બુધ્યા પ્રતિપત્રહીમિતિ બહિર્માયયા વેષ્ટયેદિતિ ધ્યાતવ્યમ્ ॥ અથ દ્વાદશસુપત્રેષુ ૐ વાસુદેવાય નૃસિંહાય નમઃ । નં વાસુદેવાય નૃસિંહાય નમઃ । મોં વાસુદેવાય નૃસિંહાય નમઃ । ભં વાસુદેવાય નૃસિંહાય નમઃ । ગં વાસુદેવાય નૃસિંહાય નમઃ । બં વાસુદેવાય નૃસિંહાય નમઃ । વાસુદેવાય નૃસિંહાય નમઃ । વાં વાસુદેવાય નૃસિંહાય નમઃ । સું વાસુદેવાય નૃસિંહાય નમઃ । દેં વાસુદેવાય નૃસિંહાય નમઃ । વાં વાસુદેવાય નૃસિંહાય નમઃ । યં વાસુદેવાય નૃસિંહાય નમઃ । એતચ્ચક્રસ્ય અરાન્વેદબુધ્યા પત્રાણિ જગતી છન્દો બુધ્યા હ્રીમિતિ બહિર્માયયા વેષ્ટયેદિતિ ધ્યાતવ્યમ્ ॥

અથ ષોડશસુપત્રેષુ -
અં કેશવાય નૃસિંહાય નમઃ ।
આં નારાયણાય નૃસિંહાય નમઃ ।
ઇં માધવાય નૃસિંહાય નમઃ ।
ઈં ગોવિન્દાય નૃસિંહાય નમઃ ।
ઉં વિષ્ણવે નૃસિંહાય નમઃ ।
ઊં મધુસૂદનાય નૃસિંહાય નમઃ ।
ઋં ત્રિવિક્રમાય નૃસિંહાય નમઃ ।
ૠં વામનાય નૃસિંહાય નમઃ ।
ૡં શ્રીધરાય નૃસિંહાય નમઃ ।
ૡૃં હૃષીકેશાય નૃસિંહાય નમઃ ।
એં પદ્મનાભાય નૃસિંહાય નમઃ ।
ઐં દામોદરાય નૃસિંહાય નમઃ ।
ઓં સઙ્કર્ષણાય નૃસિંહાય નમઃ ।
ઔં વાસુદેવાય નૃસિંહાય નમઃ ।
અં પ્રદ્યુમ્નાય નૃસિંહાય નમઃ ।
અઃ અનિરુદ્ધાય નૃસિંહાય નમઃ ।
એતચ્ચક્રસ્ય અરાઃ પત્રાણિ ચ ષોડશકલાબુધ્યા ઈમિત્યન્તર્માયયા વેષ્ટયેદિતિ ધ્યાતવ્યમ્ ॥

ૐ ઉગ્રં વીરં મહાવિષ્ણું જ્વલન્તં સર્વતો મુખમ્ ।
નૃસિંહં ભીષણં ભદ્રં મૃત્યુમૃત્યું નમામ્યહમ્ ।

ૐ ઉ ૐ ૐ નમો ભગવતે બ્રહ્મણે શ્રીનૃસિંહાય નમઃ ।

ૐ ગ્રં ૐ ૐ નમો ભગવતે વિષ્ણવે શ્રીનૃસિંહાય નમઃ ।

ૐ વીં ૐ નમો ભગવતે મહેશ્વરાય શ્રી નૃસિંહાય નમઃ ।

ૐ રં ૐ નમો ભગવતે પુરુષાય શ્રી નૃસિંહાય નમઃ ।

ૐ મં ૐ ૐ નમો ભગવતે ઈશ્વરાય શ્રીનૃસિંહાય નમઃ ।

ૐ હાં ૐ ૐ નમો ભગવતે સરસ્વત્યૈ શ્રીનૃસિંહાય નમઃ ।

ૐ વિ ૐ ૐ નમો ભગવતે શ્રીયૈ શ્રીનૃસિંહાય નમઃ ।

ૐ ષ્ણું ૐ ૐ નમો ભગવતે ગૌર્યૈ શ્રીનૃસિંહાય નમઃ ।

ૐ જ્વં ૐ ૐ નમો ભગવતે પ્રકૃત્યૈ શ્રીનૃસિંહાય નમઃ ।

ૐ લં ૐ ૐ નમો ભગવતે વિદ્યાયૈ શ્રીનૃસિંહાય નમઃ ।

ૐ તં ૐ ૐ નમો ભગવતે ૐકારાય શ્રીનૃસિંહાય નમઃ ।

ૐ સં ૐ ૐ નમો ભગવતે ચતસૃભ્યોર્ધ્વમાત્રાભ્યઃ શ્રીનૃસિંહાય નમઃ ।

ૐ ર્વં ૐ ૐ નમો ભગવતે વેદેભ્યઃ સાઙ્ગેભ્યઃ સશાખેભ્યઃ શ્રીનૃસિંહાય નમઃ ।

ૐ તોં ૐ ૐ નમો ભગવતે પઞ્ચભ્યોગ્નિભ્યઃ શ્રીનૃસિંહાય નમઃ ।

ૐ મું ૐ ૐ નમો ભગવતે સપ્તભ્યો વ્યાહૃતિભ્યઃ શ્રીનૃસિંહાય નમઃ ।

ૐ ખં ૐ ૐ નમો ભગવતે અષ્ટભ્યો લોકપાલેભ્યઃ શ્રીનૃસિંહાય નમઃ ।

ૐ નૃ ૐ ૐ નમો ભગવતે અષ્ટભ્યો વસુભ્યઃ શ્રીનૃસિંહાય નમઃ ।

ૐ સિં ૐ ૐ નમો ભગવતે રુદ્રેભ્યઃ શ્રીનૃસિંહાય નમઃ ।

ૐ હં ૐ ૐ નમો ભગવતે આદિત્યેભ્યઃ શ્રીનૃસિંહાય નમઃ ।

ૐ ભીં ૐ ૐ નમો ભગવતે અષ્ટભ્યો ગ્રહેભ્યઃ શ્રીનૃસિંહાય નમઃ ।

ૐ ષં ૐ ૐ નમો ભગવતે પઞ્ચભ્યો મહાભૂતેભ્યઃ શ્રીનૃસિંહાય નમઃ ।

ૐ ણં ૐ ૐ નમો ભગવતે કાલાય શ્રીનૃસિંહાય નમઃ ।

ૐ ભં ૐ ૐ નમો ભગવતે મનવે શ્રીનૃસિંહાય નમઃ ।

ૐ દ્રં ૐ ૐ નમો ભગવતે મૃત્યવે શ્રીનૃસિંહાય નમઃ ।

ૐ મૃં ૐ ૐ નમો ભગવતે યમાય શ્રીનૃસિંહાય નમઃ ।

ૐ ત્યું ૐ ૐ નમો ભગવતે અન્તકાય શ્રીનૃસિંહાય નમઃ ।

ૐ મૃં ૐ ૐ નમો ભગવતે પ્રાણાય શ્રીનૃસિંહાય નમઃ ।

ૐ ત્યું ૐ ૐ નમો ભગવતે સૂર્યાય શ્રીનૃસિંહાય નમઃ ।

ૐ નં ૐ ૐ નમો ભગવતે સોમાય શ્રીનૃસિંહાય નમઃ ।

ૐ માં ૐ ૐ નમો ભગવતે વિરાટ્ પુરૂષાય શ્રીનૃસિંહાય નમઃ ।

ૐ મ્યં ૐ ૐ નમો ભગવતે જીવાય શ્રીનૃસિંહાય નમઃ ।

ૐ હં ૐ ૐ નમો ભગવતે સર્વસ્મૈ શ્રીનૃસિંહાય નમઃ ।

ઇતિ શ્રીનૃસિંહાકારમૂર્તૌ વિન્યસેત્ ॥

એતચ્ચક્રસ્ય નાલદણ્ડાશ્ચ અરા ઇતિ વેદબુધ્યા વિજ્ઞેયા ત્રિકોણપત્રાણિ ચ અનુષ્ટુપ્ છન્દો બુધ્યા વિજ્ઞેયાનિહ્રીમિતિ બહિર્માયયા વેષ્ટયેદિતિ ધ્યાતવ્યમ્ ॥

તતઃ પૂર્વતઃ ષટ્ સ્વરં સામગાયેત્ ॥ અ ઊ ॥ ઉ. મ । અ. । ૐ ం મ. । અ । મ. । ઉ । ઉ. ॥ મ । ૐ મ્ । અ. ॥ ઇતિ પ્રણવઃ ॥ ઇં હા ॥ ઉ. । ઈ અ । હાં મ । ઇમ્ । મ હમ્ । ઉ । ઈં હમ્ । અ ॥ ઇતિ શક્તિબીજે ॥ ઉગ્રમ્ ॥ ઉ । વી । અ । ર મ્ । મ. । મ । મ. । હા । ઉ । વિષ્ણુમ્ । અ. । પૂર્વવત્તૃતીય ષષ્ઠાક્ષરગ્રહણસહિતં પ્રગાય ॥ પૂર્વવત્ પ્રણવં ચ ગીત્વા ॥ દ્વિતીયપાદં ષષ્ઠાક્ષરગ્રહણસહિતં ગાયેત્ ॥ જ્વલમ્ । ઉ. । તમ્ । અ. સ । મ. । ર્વ । મ. । તો । ઉ. । મુખમ્ । અ. ॥ ૐ હ્રીં શ્રીં ધૃ શ્રીમ્ । તૃતીયપાદ દ્વિતીયચતુર્થાક્ષર ગ્રહણસહિતં ગાયેત્ ॥ નૃ સી મ્ । ઉ. । હ મ્ । અ. । ભી । મ. । ષ । મ । ણ મ્ । ઉ । ભદ્રમ્ । અ ॥ ૐ ભૂર્લક્ષ્મી ભુવર્લક્ષ્મી. દયાત્ ॥ તતઃ દ્વિતીય ચતુર્થાક્ષરગ્રહણસંહિતં ચતુર્થપાદં ગાયેત્ ॥

મૃત્યૂ । ઉ । મૃ । અ । ત્યુ । મ । ન । અ । મા । ઉ । મ્યહમ્ । અ । અથ નૃસિંહગાયત્રી ॥ ૐ નૃ । ઉ । સિમ્ । અ । હા । મ । ય । મ વિ । ઉ । દ્મહે । અ । વજ ઉ. । ન । અ । ખા । મ । ય । મ । ધી । ઉ । મહી । અ । તન્નઃ । ઉ । સિમ્ । અ । હઃ । મ । પ્ર । મ । ચો । ઉ । દયાત્ । અ ॥ અથ મિશ્રણસામ ॥ ઇમા । ઉ. । હમ્ । અ । ઊ । મ । ઈમ્ । મ । મા । ઉ । હં ઓમ્ । અ ॥ ૐ હં હં ઉં ગ્રં વીરં મુખમ્ ॥ નૃસિંહં । મ્યહમ્ ॥ હં ઈં ૐ ૐ સહસ્રાર હું ફટ્ ॥ સર્વવેદદેવાત્મકમહાચક્રાગ્ન્યાત્મને વિદ્યુદ્વર્ણાય સત્યાત્મને અસ્ત્રાય ફટ્ ॥ ઇતિ તર્જન્યઙ્ગુષ્ઠયોગેન કોટિદ્વયાસ્ત્રં ન્યસેત્ ॥ ઇત્યેકોનવિંશતિ અધિકદેવતાત્મકં મહાચક્રં પઞ્ચમમસ્ત્રાઙ્ગપરં બ્રહ્મસ્વરૂપં હૃદિ ધ્યાયેત્ ॥ એવં નેત્રવર્જિતમિદં પઞ્ચાઙ્ગં વિધાય ॥ ઉદ્ધારાક્ષરપદપાદક્ષીરોદાર્ણવબ્રહ્માધિપતિ સામાનિ પ્રગેયાનિ ॥ તત્રાદૌ ઉદ્ધારસામ ગાયેત્ ॥ પાદશઃ પ્રગેયાનિ ॥ યથા ॥ ૐ ઈં હં ઉગ્રઞ્જ્વલં નૃસિં મૃત્યું ૩૪૫૬ ઉ. વીરં તં સહં ભી મૃત્યુ ૩૪૫૬ ం અ । મહાપર્વતોષણં નમા ૩૪૫૬ ઉ. । વિષ્ણું મુખં ભદ્રં મ્યહં ૩૪૫૬ અ ॥ અથ મિશ્રણસામ ॥ ઇ મા ૩૪૫૬ ઉ । હં ઉ ૩૪૫૬ અ । ઈં મા ૩૪૫૬ ઉ । હં ૐ ૩૪૫૬ ం અ ॥ ઇત્યુત્વારસામ ॥ અથ પ્રણવં પ્રગાયેત્ ॥ અ ઉ । ઉ । મ ૐ મ્ । અ । ઊ । ઉ । મ ૐ ం અ । ઇતિ પ્રણવ ॥ ઇં હ મ્ । ઉ । ઈં હ મ્ । અ । ઇ હં મ ઉ । ઈં હ મ્ । અ. ॥ ઇતિ શક્તિબીજે ॥ અત્ર મૂલમન્ત્રાક્ષરાણિ પ્રણવસમ્પુટિતાનિ પ્રગેયાનિ ॥ સર્વત્ર ઉદાત્તાનુદાત્તાભ્યાં ગાયેત્ ॥

ૐ ઉ ૐ । ૐ ગ્રં ૐ । ૐ વી ૐ । ૐ રં ૐ ૐ મં ૐ । ૐ હા ૐ । ૐ વિ ઓમ્ । ૐ ષ્ણુ ઓમ્ । ૐ જ્વ ૐ । ૐ લં ૐ । ૐ તં ૐ । ૐ સ ૐ । ૐ ર્વ ૐ । ૐ તો ૐ । ૐ મુ ૐ । ૐ ખં ૐ । ૐ નૃ ૐ । ૐ સિં ૐ । ૐ હં ૐ । ૐ ભી ૐ । ૐ ષં ૐ । ૐ ણં ૐ । ૐ ભ ૐ । ૐ દ્રં ૐ । ૐ મૃ ૐ । ૐ ત્યુ ૐ । મૃ ૐ । ૐ ત્યું ૐ । ૐ ન ૐ । ૐ મા ૐ । ૐ મ્ય ૐ । ૐ હં ૐ । તતઃ પૂર્વવત્ મિશ્રણસામ ગાયેત્ ॥ ઇત્યક્ષરસામ ॥ અથ પ્રણવગાનમ્ ॥ અ ઉ । મ ૐ મ્ । અ ઉ । મ ૐ મ્ । ઇતિ પ્રણવમ્ ॥ હં હ મ્ । ઈં હં મ્ । ઇં હ મ્ । ઈં હ મ્ ॥ ઇતિ શક્તિબીજે પ્રગાય ॥ અક્ષર પદસામ્નોઃ પ્રણવશક્તિબીજાનાં ગાનમ્ ॥ અતઃ પરં બ્રહ્માધિપતિ સામાન્તં પ્રણવશક્તિ બીજાનામુચ્ચારણમાત્રમ્ ॥ અત્ર મૂલમન્ત્રસ્યૈકાદશપદશો ગાનં

ઉદાત્તસ્વરેણ ચ ॥ નત્વનુતાત્તેન ॥ તથા હિ ॥ ઉગ્ર ૩૪પદ મ્ । ઉ । વીરમ્ । ઉ । મહાવિષ્ણુમ્ । જ્વલન્તમ્ । સર્વતોમુખમ્ । નૃસિંહ । ભીષણમ્ । ભદ્રમ્ । મૃત્યમૃત્યુમ્ । નમામિ । અહમ્ ॥ તતો મિશ્રણં ગાયેત્ ॥

અથ પાદશો ગાનં પાદસામ ॥ ઉદાત્તાનુદાત્તાભ્યાં ગાયેત્ ॥ ૐ ઇં હં ઉગ્રંવીરં ષ્ણું ૩૪પદ ૦ ઉ । જ્વલન્તં સર્વ ખં ૩૪પદ ૦ અ । નૃસિંહં ભી । દ્રં ૩૪પદ મ્ । મૃત્યુ મૃત્યું હ ૩૪પદ મ્ ॥ તતો મિશ્રણસામ ॥ ઇતિ પાદસામ ॥ તતઃ ક્ષીરોદાર્ણવસામ ઉદાત્તાનુદાત્તાભ્યાં ગાયેત્ ॥ ૐ હં હં ક્ષીરો । દાર્ણ । વશા । યિનમ્ । નૃકે । સરિ । યોગિ । ધ્યેયમ્ । પરમમ્ ।. પદમ્ । તતો મિશ્રણ ॥ ઇતિ ક્ષીરોદાર્ણવસામ ॥ ૐ ઇં હં બ્રહ્મા ॥ ધિપ । તિઃ બ્રહ્મણો । ધિપ । તિઃ તતો મિશ્રણસામ ॥

અથ નૃસિંહપ્રીતયે સ્તુત્યર્થં સત્યસામ સચ્ચિદાનન્દસામ ચ જપેત્ ॥ ૐ ઋતઁ સત્યં. પુરુષં નૃકેસરિ વિગ્રહમ્ ॥ કૃષ્ણપિઙ્ગલમૂર્ધ્વરેતં વિરૂપાક્ષં શઙ્કરં નીલલોહિતમ્ ॥ ઉમાપતિઃ પશુપતિઃ પિનાકિનંહ્યમિતિ દ્યુતિમીશાનઃ સર્વવિદ્યાનામીશ્વરઃ સર્વભૂતાનાં બ્રહ્માધિપતિર્બ્રહ્મણાધિપતિઃ ॥ ઇતિ સત્યસામ ॥ ૐ તસ્માદિદં સામસચ્ચિદાનન્દમયં પરં બ્રહ્મ તમેવં વિદ્વાનમૃત ઇહ ભવતિ ॥ ઇતિ સચ્ચિદાનન્દસામ ॥ ઇતિ તૃતીયઃ પટલઃ ॥ અથ શ્રીનૃસિંહં ધ્યાયેત્ ॥ સત્યજ્ઞાનેતિ યથોક્તરૂપં ધ્યાયેત્ ॥ અથ ત્રૈકાલિકા ધ્યાનાનિ ॥ ક્ષીરોદાલયવિદ્રુમા ચલનિભેસ્યાન્તેનમોસ્તદ્વિષેદોર્ભિશ્ચક્રધનુર્વરાભયભૃતે નાગેન્દ્રમૌલિલિષે ॥ ભાસ્વન્નીલગલાય ચોદ્ભટસટાયાઙ્કસ્થપદ્માજુષેં વિષ્વક્સૃષ્ટિવશીકૃતામૃતદૃશે સિંહાસનાયાનિશમ્ ॥ ૧॥ ઇતિ પ્રાતઃ ॥ ક્ષીરાબ્ધિસ્થો દધાનો રથચરણગયો વિદ્યુદાભઃ પિનાકમ્ ॥ વામોર્ધ્વે મોક્ષમુખ્યાખિલવરવરદો દક્ષિણાધઃકરેણ ॥ વામાઙ્કે હસ્તદત્તા ભયદ્રુતકનકત્વિટ્સ્વયં નીલકણ્ઠો । ભૂયાલ્લક્ષ્મીનૃસિંહો ભુજઙ્ગફણિવૃત્તો મત્કૃતે સાભિમાનઃ ॥ ૨॥ ઇતિ મધ્યાહ્ને ॥ નૌમિ ક્ષીરામ્બુનિધિશયિનં પૂર્ણરાકેશવર્ણમ્ ॥ લક્ષ્મીકાન્તં કરતલલસચ્ચાપમિષ્ટાભયં ચ ॥ શેષચ્છત્રં શશિસુખમુખં નીલકણ્ઠં ત્રિનેત્રમ્ ॥ શાન્તેઃ પુષ્ટે વિપદિ તરણં કારણં શ્રીનૃસિંહમ્ ॥ ૩॥ ઇતિ સાયઙ્કાલે ॥

અથ વિંશતિ શ્લોકી ધ્યાનમ્ ॥

મહાચક્રસ્ય નાભ્યાં તુ ચિન્તયેત્ ક્ષીરસાગરમ્ ।
ક્ષીરસાગરમધ્યસ્થં શ્વેતદ્વીપં વિચિન્તયેત્ ॥૧॥

તન્મધ્યે તુ મહાદિવ્યં પ્રાસાદં રત્નનિર્મિતમ્ ।
પ્રાસાદમધ્યે ચન્દ્રાભં સિંહાસનમનુત્તમમ્ ॥૨॥

તસ્યોપરિ મહાભાગં શેષાખ્યં ફણિમણ્ડિલમ્ ।
તદાસનગતં દેવં તત્ફણૈર્વ્યાપ્તમસ્તકમ્ ॥૩॥

પૂર્ણેન્દુ કોટિપ્રતિભં નીલકણ્ઠં ત્રિલોચનમ્ ।
બાલેન્દુમણ્ડિતસટં કુણ્ડલાભ્યાં વિરાજિતમ્ ॥૪॥

અનેકરત્નખચિતં મુકુટેન ચ શોભિતમ્ ।

કાઞ્ચ્યાઙ્ગુલીયવલયં નુપુરાઙ્ગદભૂષણૈઃ ॥ ૫ ॥

વરદાભયહસ્તં ચ ચક્રહસ્તં પિનાકિનમ્ ।
સર્વાઙ્ગસુન્દરં દેવં સર્વાભરણભૂષિતમ્ ॥ ૬ ॥

સ્રષ્ટારં સર્વજગતાં ત્રાતારં સર્વકામદમ્ ।
તારૈકાક્ષરમધ્યસ્થં નૃસિંહં દિવ્યરૂપિણં ॥ ૭ ॥

યોગપટ્ટાસનસ્થં ચ મહામાયેશ્વરં વિભુમ્ ।
વામભાગેશ્રિતાં દેવીં નીલકુઞ્ચિતમૂર્દ્ધજાઃ ॥ ૮ ॥

હેમારવિન્દપ્રતિભાં મૌક્તિકાભરણોજ્વલામ્ ।
દાડિમં સવ્યહસ્તેન દક્ષેનાલિઙ્ગ્ય સસ્મિતમ્ ॥ ૯ ॥

દેવસ્યાભિમુખીં ધ્યાયેદ્ભક્તાભીષ્ટફલપ્રદામ્ ।
લક્ષ્મ્યાદ્યાઃ શક્તયો દેવં વીજયન્ત્યઃ સમન્તતઃ ॥ ૧૦ ॥

લાવણ્યામૃતતોયેન સિંઞ્ચિત્યોઽપિ ચ સર્વશઃ ॥
શક્તિભિર્મદરત્નાભિઃ સર્વતઃ પરિવારિતમ્ ॥ ૧૧ ॥

સિદ્ધગન્ધર્વનાગૈશ્ચ વિદ્યાધરવધૂગણૈઃ ॥
ચામરૈવીરાજ્યમાનં ચ લક્ષ્મ્યાદ્યાભિશ્ચ શક્તિભિઃ ॥ ૧૨ ॥

ગાયન્તીભિસ્તુવન્તીભિર્નિષેવિતમ્ ।
સનકાદ્યૈયગિવરૈર્બ્રહ્મેશાદ્યૈઃ સુરોત્તમૈઃ ॥ ૧૩ ।
દક્ષેતિગ્મદ્યુતિં ચૈવ હિમાંશું વામતઃ સ્થિતમ્ ।
વેદૈઃ સાઙ્ગૈર્મન્ત્રવરૈસ્તૂયમાનં મુદાન્વિતમ્ ॥ ૧૪ ॥

ગીયમાનં સુદેવેશં સામગૈર્બ્રહ્મવાદિભિઃ ।
આયુધપ્રવરૈશ્ચૈવ મૂર્તિમદ્ભિરુપાસિતમ્ ॥ ૧૫ ॥

ષભિઃ સુદર્શનૈરન્તર્માયયા સમલઙ્કૃતમ્ ।
અષ્ટદ્વાદશપત્રસ્થૈઃ સેવિતં પરમ મુદા ॥ ૧૬ ॥

નારાયણૈર્વાસુદેવૈર્વેષ્ટિતં બ્રાહ્મમાયયા ।
માતૃકાભિઃ ષોડશભિસ્તયાન્તર્માયેયાવૃતમ્ ॥ ૧૭ ॥

દ્વાત્રિંશદ્ભિઃ નૃસિંહૈશ્ચ વેષ્ટિતં બાહ્મમાયયા ।
વસુભીર્રુદ્રૈરાદિત્યૈર્વિશ્વેદેવૈર્યથાક્રમં ॥ ૧૮ ॥

સર્વાપત્તારકં ચક્રં કાલાનલસમપ્રભમ્ ।

એવં નૃસિહં ચક્રસ્થં સકૃત્ધ્યાયાલિ યો નરઃ ॥ ૧૯॥

આચષ્ટે તારકં બ્રહ્મ કૃપાલુઃ પરમેશ્વરઃ ।
સર્વાપભ્દયો વિમુચ્યતે મૃત્યું જયતિ દુસ્તરમ્ ॥ ૨૦॥

ઐહિકામુષ્મિકાન્ભોગાન્પ્રાપ્નોત્યવ્યહતાન્નરઃ ॥
ય ઇદં પરમં ગુહ્યં નૃસિંહં ધ્યાનમુત્તમમ્ ॥
પઠત્યનુદિનં ભક્ત્યા નૃસિંહત્વમવાપ્નુયાત્ ॥ ૨૧॥

ઇતિ શેષભગવત્કૃતં ધ્યાનં સમાપ્તમ્ ॥

અથ શતશ્લોકી ધ્યાનમ્ ।
મહાચક્રસ્ય સન્નાભિમણ્ડલે ત્રિગુણાત્મનિ ।
સુખં સંવીત્ક્ષીરજલં ચિન્તયેત્ ક્ષીરસાગરમ્ ॥ ૧॥

શ્વેતદ્વીપં ચ તન્મધ્યે શબ્દાદિવિષયાત્મકઃ ।
જાતિબ્રહ્મવનોપેતંસ સદ્રલંસિકતાઞ્ચિતમ્ ॥ ૨॥

મણિરત્નમયે તત્ર પ્રાસાદે સુમનોહરે ।
શ્વેતસિંહાસનં ધ્યાયેત્ શ્વેતપદ્મોત્તરચ્છદં ॥ ૩॥

શેષં તત્ર વિજાનીયાત્સપ્તત્યાપુચ્છમણ્ડલૈઃ ।
ફણાસહસ્રમુપરિ છત્રીકૃત્ય વ્યવસ્થિતમ્ ॥ ૪॥

શ્વેતહારકિરીટાભ્યાં દધાનં મુસલં હલમ્ ।
રક્તાક્ષં શ્વેતપુષ્પસ્રક્ નીલવસ્ત્રૈકકુણ્ડલમ્ ॥ ૫॥

તદઙ્ગે ચિલયેદ્દેવં નૃસિહં પીતવાસસમ્ ।
સૂર્યેન્દુકોટિમહસમરુણોત્તરવાસસમ્ ॥ ૬॥

શ્વેતાદ્રિકાન્તિવપુષં સત્યજ્ઞાનસુખાત્મકમ્ ॥

આસીનં યોગપટ્ટેન ચતુર્દંષ્ટ્રં ચતુર્ભુજમ્ ॥ ૭॥

પ્રાદક્ષિણ્યેન દધતમૂર્ધ્વદક્ષિણબાહુકે ।
ચક્રં પિનાકનભયં વરં કરચતુષ્ટયે ॥ ૮॥

તપ્તહાટકકેશાન્તં ચન્દ્રાર્ધકૃતશેખરમ્ ।
સુકપોલં સુવિસ્તીર્ણલલાટફલકોજ્વલમ્ ॥ ૯॥

ચન્દ્રસૂર્યાગ્નિસઙ્કાશં વૃત્તોત્ફુલ્લત્રિલોચનમ્ ।

ફુરત્કમલકિઞ્જલ્કસમરોમાન્તકર્ણકમ્ ॥ ૧૦॥

કિઞ્ચિદુન્નતમધ્યેષત્ફુલ્લનાસામનોહરમ્ ।
લલજ્જિકાપ્રપઞ્ચાસ્યપ્રકાશિતરદાવલિ ॥ ૧૧॥

શ્મશ્રુલમ્બિતસૃક્વાણં કિઞ્ચિદ્કુઞ્ચિતભ્રુવમ્ ।
સ્તબ્ધધૂરોપમપક્ષ્માણં તિર્યગાલમ્બિકેસરમ્ ॥ ૧૨॥

કકુદં સશિરઃ કણ્ઠપ્રાકુઞ્ચિતકચોચ્ચયમ્ ।
નીલગ્રીવં પ્રકૃત્યાત્મા શ્રીવત્સાઙ્કિતવક્ષસમ્ ॥ ૧૩॥

વિસ્તીર્ણોરસ્થલલુઠત્પુરુષાત્મકકૌસ્તુભમ્ ।
વિષ્ટબ્ધપાર્શ્વપૃષ્ઠાસ્થિમગ્નનાભ્યઙ્કિતોદરં ॥ ૧૪॥

તિર્યક્સંસ્થિજઙ્ઘોરૂ જાન્વાહિતકરદ્વયમ્ ।
તીક્ષ્ણોગ્રનખવજ્રાલિરોચિર્વિદ્રાવિતાસુરમ્ ॥ ૧૫॥

તિર્યક્પાદતલસ્પર્શકૃતાર્થીકૃતવાસુકિમ્ ।
કિરીટહારકેયૂરકાઞ્ચીકટકભૂષિતમ્ ॥ ૧૬॥

આયુક્તજઙ્ઘાભરણં પાદાન્તવ્યાપ્તનૂપુરમ્ ।
રત્નાંઙ્ગુલીયકજ્યોતિરુદ્ભાસિત દિગમ્બરમ્ ॥ ૧૭॥

સમકર્ણાન્તવિન્યસ્તચારકુણ્ડલભૂષિતમ્ ।
પઞ્ચભૂતાત્મિકાં પઞ્ચરૂપાં માલાં ચ બિભ્રતમ્ ॥ ૧૮॥

વામારૂગતયા લક્ષ્મ્યાશ્લિષ્ટં દક્ષિણબાહુના ।
દધત્યા વામહસ્તેન દાડિમં સુમનોહરમ્ ॥ ૧૯॥

સ્વર્ણરત્નાભરણયા પીતકૌશેયવસ્ત્રયા ।
હિરણ્યવર્ણયાન્યસ્તદૃશા સ્વામિમુખામ્બુજે ॥ ૨૦॥

નાનારૂપધરૈઃ શસ્ત્રૈઃ પૃષ્ઠપાર્શ્વગતૈઃ પૃથક્ ।
સ્વસ્વાયુધોદ્યતકરૈઃ મૂર્તિમદ્ભિરુપાસિતમ્ ॥ ૨૧॥

સચામરૈર્વિરજ્યમાનં લક્ષ્મ્યાદ્યાભિશ્ચ શક્તિભિઃ ।
સંસાક્તાભ્યનુરક્તાભિરન્યાભિઃ પરિવારિતમ્ ॥ ૨૨॥

યક્ષ પન્નગગન્ધર્વવિદ્યાધરવધૂગણૈઃ ।
નૃત્યવાદિત્રસઙ્ગીતસ્તુતિભિઃ કાઙ્ક્ષિતેક્ષણં ॥ ૨૩॥

સુરાસુરગણૈશ્ચૈવં પ્રસાદાવાપ્તદર્શનૈઃ ।
કૃતાઞ્જલીભિરાજ્ઞાર્થં કિઙ્કરૈર્દૂરતસ્થિતૈઃ ॥ ૨૪॥

અન્તરિક્ષગતૈઃ સિદ્ધૈઃ યોગિભિઃ સનકાદિભિઃ ।
સંસ્તૂયમાનમેકાદ્યૈરૃગ્યજુઃસામમન્ત્રગૈઃ ॥ ૨૫॥

ઐશાનીં દિશમારભ્ય મહાચક્રદલસ્થિતૈઃ ।
પદ્માસનૈરભિમુખૈર્વીક્ષમાણં સુદર્શનૈઃ ॥ ૨૬॥

નારાયણૈર્વાસુદેવૈઃ કેશવાદ્યૈર્યથાક્રમમ્ ।
બ્રહ્માદ્યૈર્નારિસિંહૈશ્ચ સ્વસ્વવર્ણાયુધાન્વિતૈઃ ॥ ૨૭॥

પુરસ્તાદ્વસુભિસ્તસ્ય રુદ્રૈર્દક્ષિણસ્થિતૈઃ ।
ચક્રસ્ય પશ્ચાદાદિત્યૈર્વિશ્વેદેવૈર્યથાપ્યુદક્ ॥ ૨૮॥

ઉપોપવિષ્ટઃ પાદાન્તે બ્રહ્મવિષ્ણુમહેશ્વરૈઃ ।
સ્વસ્વાયુધકરૈરૂર્ધ્વં કૃતાઞ્જલિપુટધરૈઃ ॥ ૨૯॥

તથૈવોપસ્થિતં ચન્દ્રસૂર્યાભ્યાં પાર્શ્વયોર્દ્વયોઃ ।
મહાવિભૂતિસંસ્થાનં સર્વદેવાત્મકં પ્રભુમ્ ॥ ૩૦॥

બ્રહ્માજ્ઞેયઃ શિરસ્તસ્ય પિતરઃ સર્વષયઃ સટાઃ ।
રુદ્રો લલાટં વિદ્યુત્ભૂરશ્વિનૌ નાસિકે સ્મૃતૌ ॥ ૩૧॥

શ્રોત્રે દિશોથ ગણ્ડૌ દ્વૌ નારદસ્તુમ્બરૂસ્તથા ।
મુખમગ્નીરદાભાનિ દંષ્ટ્રાસ્તા કાલરાત્રયઃ ॥ ૩૨॥

દ્યાવાપૃથિવ્યા વોષ્ઠૌ દ્વૌ રસના તુ સરસ્વતી ।
વેદા વાચસ્પતિઃ કણ્ઠઃ સ્કન્ધૌ ગુહવિનાયકૌ ॥ ૩૩॥

સ્તનૌ બૃહસ્પતિઃ શુક્રઃ સેન્દ્રાદેવાસ્તુ બાહવઃ ।
સર્પા અઙ્ગુલયો જ્ઞેયાઃ શસ્ત્રાસ્ત્રાણિ તથા નખાઃ ॥ ૩૪॥

લક્ષ્મીર્વક્ષસ્થલં તસ્ય પ્રાણો નારાયણાત્મકઃ ।
ધર્માત્માનૌ ચર્મ વર્મ નાભિર્ગગનમુચ્યતે ॥ ૩૫॥

જગચ્ચ જઠરં સાધ્યાઃ પાર્શ્વે દ્વે ઇતિ હિ શ્રુતિઃ ।
પૃષ્ઠં તુ મરુતો દેવા લિઙ્ગં તસ્ય પ્રજાપતિઃ ॥ ૩૬॥

ઉરૂ દ્વૌ વસવઃ પ્રોક્તૌ જઙ્ઘે સ્વચરણૌ તુ ભૂઃ ।
સિદ્ધાઃ સાધ્યા પુરારોમા નદ્યો ધમનયઃ સ્મૃતાઃ ॥ ૩૭॥

અસ્થીનિ પર્વતાસ્તસ્ય હિરણ્યં રેત ઉચ્યતે ।
ક્રોધો રુદ્રઃ સમાખ્યાતો જ્યોતિર્ભૈરવરૂપધૃક્ ॥ ૩૮॥

શઙ્ખચક્ર ગદાશાઙ્ ચક્રં લોહિત મુચ્યતે ।
શઙ્ખચક્રગદાશાઃ શઙ્ખશઙ્ખનિભઃ સ્મૃતઃ ॥ ૩૯॥

ગદા ચક્રાબ્જ શાઙ્ગી ગતાપીતા નિગદ્યતે ।
સશાગચક્રાબ્જગદં શાર્ઙીનીલામ્બુદપ્રભમ્ ॥ ૪૦॥

બાણા જપાનિભાનીલી શઙ્ખચક્રધનુર્ધરાઃ ।
ખડ્ગચક્રગદાશાઙ્ગ ખડ્ગો ધૂમ્રઃ પ્રકીર્તિતઃ ॥ ૪૧॥

ગદાબુદ્ધિરહઙ્કારઃ શઙ્ખ શાઙ્ગદ્વિધા સ્થિતમ્ ।
ભૂતાદીન્દ્રિયાદીંશ્ચ મનશ્ચક્રં વિદુર્બુધાઃ ॥ ૪૨॥

શરાસ્તાનિન્દ્રિયાણ્યાહુર્બુદ્ધિકર્માત્મિકાનિ વૈ ।
વિદ્યાં ખડ્ગં તથૈવાહુરવિદ્યા ચર્મ સૂચ્યતે ॥ ૪૩॥

શૂલં હલં ચ મુસલં ધવલં ત્રિતયં સ્મૃતમ્ ।
શૂલાદિ પ્રથમં કૃત્રા શઙ્ખચક્રગદાધરાઃ ॥ ૪૪॥

ચતુર્ભુજાસ્તે ચક્રાદ્યાઃ સુવર્ણવસનાયુધાઃ ।
ચક્રાદિ ચિહ્ન મુકુટાઃ ખડ્ગો જ્ઞેયોરુણામ્બરઃ ॥ ૪૫॥

અથ ષટ્શ્લોકૈઃ કથ્યતે ।
આદ્યા ચતુર્થે ચક્રે ઋતુપુરુષાખ્યૈ રસૈસ્સદલૈઃ ।
ઈમિતિ પીતાન્તત્રાન્તર્માયયા વેષ્ટિતા નેમિઃ ॥ ૪૬॥

વેદાઙ્ગાયત્રી જગત્યનુષ્ટુભં દલં શેષમ્ ।
ચક્રત્રિતયં તત્ર ક્ષ્મિમિતિ શુક્લા બહિર્માયયા ॥ ૪૭॥

સ્ફુરદટ્ટહાસવિકટોગ્રદંષ્ટ્રદીપ્તાનનાન્ રૌદ્રાન્ ।
પિઙ્ગોર્ધ્વભીમકેશાન્ ભીમાક્ષાન્નવર વિપ્રરવ્યાન્ ॥ ૪૮॥

ચક્રધરં સરોજખડગાઙ્કુશપાશમુસલગદાઃ ।
સહ સર્વૈરાભરણૈરમલૈર્દધાતઃ સુદર્શનાન્વન્દે ॥ ૪૯॥

અસિતાનસિતસુપીતક્ષિતિલક્ષ્મીભ્યાં પરિભક્તાન્ ।
ચક્રામ્બુજં શઙ્ખગદાદધતો નારાયણાન્વન્દે ॥ ૫૦॥

પ્રણતોઽસ્મિ વાસુદેવાન્ ચક્રધરામ્બુજગદહસ્તાન્ ।
નિખિલવિભૂષણભૂષિત સિતવપુષઃ સિતરોજગતાન્ ॥ ૫૧॥

શઙ્ખચક્રગદાપદ્મૈઃ કેશવઃ કનકપ્રભઃ ।
ક્ષીરામ્ભોબ્જગદાચક્રધરૈઃ નારાયણઃ સ્મૃતઃ ॥ ૫૨॥

માધવઃ શઙ્ખચક્રાબ્જ ગદાહસ્તોજપાનિભઃ ।
મનઃશીલાભો ગોવિન્દો ગદાપદ્મદરાદિભિઃ ॥ ૫૩॥

સપદ્મશઙ્ખાદિગદો વિષ્ણુશ્ચાલક્તકપ્રભઃ ।
શઙ્ખચક્રગદાપદ્મૈરર્જુનો મધુસૂદનઃ ॥ ૫૪॥

સગદાશઙ્ખચક્રાબ્જો નીલાબ્જાભસ્ત્રિવિક્રમઃ ।
રક્તશ્ચક્રગદાપદ્મશઙ્ખૈર્વામન ઉચ્યતે ॥ ૫૫॥

ચક્રીદારીગદીસાજશ્રીધરઃ કુમુદપ્રભઃ ॥

કાશ્મીરાભો હૃષીકેશઃ સચક્રાબ્જદરોગદી ॥ ૫૬॥

પદ્મચક્ર ગદાશઙ્ગૈઃ પદ્મનાભો જનપ્રભઃ ।
દામોદરઃ શઙ્ખગદાચક્રાબ્જૈઃ ક્ષીરસન્નિભઃ ॥ ૫૭॥

સ્ફટિકાભો વાસુદેવઃ શઙ્ખાદ્યબ્જગદાધરઃ ।
સઙ્કર્ષણોદરાબ્જાદિદરૈઃ કનકસન્નિભઃ ॥ ૫૮॥

શઙ્ખાગદીસાબ્જચક્રી પ્રદ્યુમ્નો વજ્રસન્નિભઃ ।
ગદીશઙ્ખી સાબ્જચક્રસ્ત્વનિરુદ્ધો સિતપ્રભઃ ॥ ૫૯॥

બ્રહ્માદ્યા નારસિંહાસ્તુ સ્વસ્વલક્ષણલક્ષિતાઃ ।
નૃસિંહાકારવદનાઃ સર્વ એવ ત્રિલોચનાઃ ॥ ૬૦॥

દધાતિ સ્રુવરસ્રુવૌ બ્રહ્માવિષ્ણુશ્ચક્રસશઙ્ખકમ્ ।
મહેશ્વરઃ શૂલચાપૌ પુરુષઃ શઙ્ખચક્રભૃત્ ॥ ૬૧॥

દધાતિ ચેશ્વરઃ શૂલં ડમરું ચ યથાક્રમમ્ ।
લેખની પુસ્તકં ચેતિ દધાતિ દ્વે સરસ્વતી ॥ ૬૨॥

પદ્મદ્વયં દધાતિ શ્રીગૌરી નીલોત્પલદ્વયમ્ ।
પ્રકૃતિશ્ચ તથા -વિદ્યા પાશાઙ્કુશધરે શુભે ॥ ૬૩॥

અભીતિવરદાઃ સર્વે ધવલાસ્તે ચતુર્ભુજાઃ ।

પુરુષં દ્વિભુજં કેચિત્ પ્રવદન્તિ નિરાયુધમ્ ॥ ૬૪॥

એકાદશોત્તરે વિશ્વરૂપધૃક્ ચક્રશઙ્ખિનઃ ।
ૐ કારાઽકિત વક્ષાંસ્તુ પીતઓઙ્કાર ઉચ્યતે ॥ ૬૫॥

ઓઙ્કારાનન્તરં માત્રાશ્ચતસ્રસ્તસ્ય સંસ્થિતાઃ ।
વેદાઃ સાઙ્ગાઃ સશાખાશ્ચ વિજ્ઞેયાસ્તદનન્તરમ્ ॥ ૬૬॥

પઞ્ચાગ્નેયસ્તતો જ્ઞેયાઃ સપ્તવ્યાહૃતયસ્તથા ।
લોકપાલાસ્તતશ્ચાષ્ટૌ વસવોષ્ટૌ તતઃ સ્મૃતાઃ ॥ ૬૭॥

રુદ્રાઃ પરં તતો જ્ઞેયાશ્ચાદિત્યાસ્તદનન્તરમ્ ।
અષ્ટૌ ગ્રહાસ્તતઃ પશ્ચાન્મહાભૂતાનિ પઞ્ચ ચ ॥ ૬૮॥

કાલઃ પાશાઙ્કુશીકાલઃશ્ચક્રં શઙ્ખીમનુસ્મૃતઃ ।
ધૂમ્રઃ પાશાઙ્કુશી મૃત્યુઃ શ્યામૌ જ્ઞેયૌ યમાન્તકૌ ॥ ૬૯॥

તૌ પાશમુદ્ગરધરૌ પ્રાણશ્ચ ક્રદરીસિતઃ ।
રક્તાબ્જદ્વયવાન્ રક્તસૂર્યઃ સોમસ્તુ પાણ્ડુરઃ ॥ ૭૦॥

દધાત્યમૃતસમ્પૂર્ણં કુણ્ડં દણ્ડં ચ શોભનમ્ ।
સ વિરાટ્ પુરુષો જીવઃ શુક્લશ્ચક્રદરાયુધઃ ॥ ૭૧॥

સર્વવર્ણાયુધૈઃ સર્વે ચેતનાચેતનાત્મકમ્ ।
બ્રહ્માદિશક્તયશ્ચાત્ર સરસ્વત્યાદયઃ સ્મૃતાઃ ॥ ૭૨॥

અર્ધમાત્રાશ્ચતસ્રસ્તા ૐ કારસ્યૈવ શક્તયઃ ।
સપ્તવ્યાહૃતયોગ્નીનાં વેદાનાં ચૈવ શક્તયઃ ॥ ૭૩॥

વસવો હરિતાઃ સર્વે તે જ્ઞેયા ખઙ્ગચર્મિણઃ ।
શૂલખઙ્ગાઙ્ગિનો રુદ્રાઃ શુક્લા ભસ્મકપર્દિનઃ ॥ ૭૪॥

આદિત્યા લોહિતાઃ સર્વે રક્તા અદ્ભયધારિણઃ ।
વિશ્વેદેવાઃ સુવિશદાઃ સર્વે બાણધનુર્ધરાઃ ॥ ૭૫॥

બ્રહ્મા રક્તઃ સુવર્ણાભો વિષ્ણુઃ સ્યાત્ શ્યામસન્નિભઃ ।
મહેશઃ શુક્લવર્ણશ્ચ વિજ્ઞેયઃ સિંહવક્ત્રવઃ ॥ ૭૬॥

સર્વે ચતુર્ભુજાસ્તત્ર કેષાઞ્ચિદ્વિભુજઃ શશી ।
સકલાવરણાતીતં નિરાલમ્બન-ભાવનમ્ ॥ ૭૭॥

નૃસિંહં ભાવયન્ત્યેતે તન્મયાસ્તદ્વિભૂતયઃ ।
મન્ત્રમૂર્તિધરસ્યાસ્ય સાઙ્ગાઃ પાદાઃ શ્રુતીરિતાઃ ॥ ૭૮॥

હૃતશિરસ્તુ શિખા ચૈવ કવચં ચ યથાક્રમમ્ ।
સમગ્રં ચ તથા મન્ત્રમસ્ત્રન્નેત્રવિવર્જિતમ્ ॥ ૭૯॥

શસ્ત્રાણિ શ્રીનૃસિંહસ્ય પૂર્વોક્તાનિ પ્રચક્ષતે ।
અસ્ત્રં તદેવ દેવસ્ય મહાચક્રાખ્યમીરિતમ્ ॥ ૮૦॥

પ્રણવસ્ય તુ યા માત્રાસ્તાભિસ્તેષુ હૃદાદિષુ ।
ભૂર્ભુવઃ સ્વઃસ્ત્રયો લોકાઃ બ્રહ્મલોકસ્તદાશ્રયઃ ॥ ૮૧॥

અગ્ન્યાદયસ્તથા સૂર્યઃ સોમબ્રહ્માદયઃ સુરાઃ ।
ચતુર્ષુ મન્ત્રપાદેષુ સમાત્રેષુ વ્યવસ્થિતાઃ ॥ ૮૨॥

ઋગ્યજુઃ સામાથર્વાણઃ સાઙ્ગાઃ શાખાઃ સમન્વિતાઃ ।
મન્ત્રસ્ય પાદાશ્ચત્વાર ઇત્યાથર્વણી શ્રુતિઃ ॥ ૮૩॥

પ્રણવઃ પ્રથમઃ પ્રોક્તો બ્રહ્મરૂપઃ સનાતનઃ ।
રક્તાબ્જદ્વયંવાન્ રક્તો ઘૃણિઃ સૂર્યો દ્વિતીયકે ॥ ૮૪॥

તૃતીયે તુ યજુર્લક્ષ્મીશ્ચાર્વઙ્ગી પદ્મધારિણી ।
તુર્યે નૃસિંહગાયત્રી નૃસિંહાકારધારિણી ॥ ૮૫॥

ઉક્તાન્ય" ગાનિ મન્ત્રસ્ય સામ્ના શ્રુતિનિદર્શનાત્ ।
જ્ઞાતવ્યં દેવદેવસ્ય ધ્યાનં સર્વોત્તમોત્તમમ્ ॥ ૮૬॥

ઉદ્ગ્રહણાતીહ ભૂતાનિ સર્વાણ્યુહ્યતેઽપિ ચ ।
સર્ગે વિસર્ગૈર્વાસૈશ્ચ યસ્તંવરં નમામ્યહમ્ ॥ ૮૭॥

વિરામયતિ ભૂતાનિ સર્વાણિ વિરમત્યિ ।
સર્ગે વિસર્ગૈર્વાસૈશ્ચ યસ્તં વીરં નમામ્યહમ્ ॥ ૮૮॥

સ્વમહિમ્ના જગત્સર્વં વ્યાપ્નોતિ વ્યાપ્યતેઽપિ ચ ।
વ્યતિષિક્તો મહાદેવો મહાવિષ્ણું નમામ્યહં ॥ ૮૯॥

જલન્યસ્તેજસા સ્વેન જ્વાલયન્નખિલં જગત્ ।
અશેષમૂર્તિર્વિશ્વાત્મા જ્વલન્તં તં નમામ્યહમ્ ॥ ૯૦॥

સર્વતોક્ષિશ્રુતિઘ્રાણં સર્વતઃ પાણિપાદકમ્ ।
સર્વેન્દ્રિયૈરસમ્બન્ધં પ્રપદ્યે સર્વતોમુખમ્ ॥ ૯૧॥

જગદ્ધિતં પ્રપન્નોઽસ્મિ હ્યજિતં વીર્યવત્તમમ્ ।
નૃવચ્ચ સિંહવચ્ચૈવ નૃસિંહં પરમેશ્વરમ્ ॥ ૯૨॥

યસ્ય ભીમસ્ય દેવાદ્યાઃ સર્વે ભીત્યાતિભીષણમ્ ।
રૂપં દૃષ્ટ્વા પલાયન્તે ભીષણં તં નમામ્યહં ॥ ૯૩॥

ભદ્રં દદાતિ ભક્તેભ્યો યઃ સદા ભદ્રરૂપધૃક્ ।
ભદ્રાચારસ્ય ગોપ્તારં ભદ્રં તં પ્રણમામ્યહમ્ ॥ ૯૪॥

સ્મૃત એવ હિ ભક્તાનાં યો હિંસ્રાન્મારયત્યજઃ ।
મૃત્યું ચેવાપમૃત્યું ચ મૃત્યું મૃત્યું નમામ્યહમ્ ॥ ૯૫॥

ભક્ત્યા નમન્તિ યં સર્વે દેવાઃ સબ્રહ્મ વાદિનઃ ।
ભુક્તિમુક્તિપ્રદં સર્વ નમસ્કાર્યં નમામ્યહમ્ ॥ ૯૬॥

યસ્યાત્મા સર્વમેવેદં યોન્નઃ સર્વ શરીરિણામ્ ।
સર્વભૂતેષુ ચાત્માનં સર્વાત્માનં નમામિ તમ્ ॥ ૯૭॥

ક્ષીરોદાર્ણવમધ્યસ્થ યોગિધ્યેયં પરં પદમ્ ।
અમિતદ્યુતિમીશાનં પ્રપદ્યે તં પિનાકિનમ્ ॥ ૯૮॥

ઋતં સત્યં પરં બ્રહ્મ પુરુષં ચોર્ધ્વરેતસમ્ ।
પ્રપદ્યેહં વિરૂપાક્ષં શઙ્કરં નીલલોહિતમ્ ॥ ૯૯॥

ઉમાપતિં પશુપતિ તથા ચૈવામિતદ્યુતિમ્ ।
ઈશાનં સર્વવિદ્યાનાં નરકેસરિવિગ્રહઃ ॥ ૧૦૦॥

ઈશ્વરં સર્વભૂતાનાં પ્રપદ્યે કૃષ્ણપિઙ્ગલમ્ ।
તસ્માત્તત્સચ્ચિદાનન્દમયં બ્રહ્મસ્વરૂપિણમ્ .. .. ૧૦૧॥

સ્મૃતે સકલકલ્યાણં ભાજનં યત્ર જાયતે ।
પુરુષસ્તમજં નિત્યં વ્રજામિ શરણં હરિમ્ ॥ ૧૦૨॥

યન્નામકીર્તનં પુસાં સદ્યો દહતિ પાતકમ્ ।
કરોતિ ચાક્ષયં પુણ્યં પ્રપદ્યે હ્યનઘવૃષમ્ ॥ ૧૦૩॥

યસ્યાવતારરૂપાણિ સદાર્ચન્તિ દિવૌકસઃ ।
અજાનન્તઃ પરં રૂપં તં વન્દે પુરૂષોત્તમમ્ ॥ ૧૦૪॥

યસ્ય પાદોદકૈઃ સ્નાત્વા યસ્યોચ્છિષ્ટાનિ ભુઞ્જતે ।

નિત્યં ભાગવતા ભક્ત્યા તં વન્દે સાત્વતઃ પ્રિયમ્ ॥ ૧૦૫॥

અથ દશકશ્લોકૈઃ ફલશ્રુતિઃ ।
ઇદં ધ્યાનશતં નિત્યં પઠતઃ શ્રૃણ્વતોઽપિ વા ।
પુનર્ભવભયં નાસ્તિ પરલોકભયં કુતઃ ॥ ૧॥

સર્વૈશ્વર્યં દદાતીહ સન્તુષ્ટઃ પરમેશ્વરઃ ।
દેહાન્તે તારકં બ્રહ્મ વ્યાચષ્ટે કર્ણમૂલકે ॥ ૨॥

તદેવ વ્યાપ્તકામોયં કથં સન્તોષ્યતાં પ્રભુમ્ ।
મા મન્યધ્વમિતિ પ્રાજ્ઞા ભક્તિગ્રાહ્યા હિ દેવતા ॥ ૩॥

તુલસીદલમાત્રેણ જલસ્ય ચુલકેન તુ ।
વિક્રીણીતે યમાત્માનં ભક્તોભ્યો ભક્તવત્સલઃ ॥ ૪॥

ભવપાશં છિનત્યેષઃ પ્રદદાતાત્યાત્મનઃ પદમ્ ।
માનસાર્ચનમાત્રેણ ભક્તિપ્રીતો નૃકેસરી ॥ ૫॥

સ્વધર્મપાલનં સમ્યગદ્રોહઃ સર્વજન્તુષુ ।
શ્રુત્વા ભક્તિઃ પરેશસ્ય મૂલં સન્તોષકારણમ્ ॥ ૬॥

જ્ઞાનયોગસહસ્રાદ્ધિ ભક્તિયોગો વિશિષ્યતે ।
ઇતિ સઞ્ચિન્ત્ય સઞ્ચિન્ત્ય ભક્તિમગ્રે કૃતા બુધૈઃ ॥ ૭॥

સંવત્સરોષિતે દેયમિદં ધ્યાનં સુધાર્મિકે ।
ન ચાભક્તેન ચાશાન્તેન ચાશૃધ્કેન ન ચાનૃતૌ ॥ ૮॥

અસ્થાને હિ વિનિર્મુક્તા મન્ત્રાઃ કૃત્યાસ્તથૈવ ચ ।
તત્ર નિર્વીર્યતાં પ્રાપ્ય વિનિઘ્નન્તિ પ્રયોજનમ્ ॥ ૯॥

યસ્ય દેવે પરા ભક્તિર્યથા દેવે તથા ગુરૌ ।
તસ્યૈતે કથિતા હ્યર્થાઃ પ્રકાશન્તે મહાત્મનઃ ॥ ૧૦॥

ઇતિ શ્રીરત્નમાલાયા શ્રૌતપદ્ધતૌ ધ્યાનશતકં નામ ચતુર્થઃ પટલઃ ॥ ૬॥ શ્રીનૃસિંહ ॥ ૬॥

એવં સાઙ્ગં નૃસિહં ધ્યાત્વા ॥

તદાત્મકોઽહમિતિ ભાવયેત્ ॥ અથ પુરશ્ચરણોપાસ્તિરભિધીયતે ॥ તત્ર પ્રથમસ્તાવત્પુષ્પાઞ્જલીમન્ત્રાઃ તન્મન્ત્રૈર્મહાચક્રં વર્તિનો બ્રહ્માદિ દ્વાત્રિંશદ્વ્યૂહદેવતાન્મૂલં વ્યૂહં ચાષ્ટચત્વારિંશન્મન્ત્રૈઃ પ્રત્યેકં માનસકુસુમાઞ્જલિનોપાસીત । તથા હિ ॥

ॐ ઉં ॐ ॐ નમો ભગવતે બ્રહ્મણે શ્રીનૃસિંહાય નમઃ ॥ પુષ્પાઞ્જલિં સમર્પયામિ ॥ એવં સર્વત્ર ।
ॐ ગ્રં ॐ ॐ નમો ભગવતે વિષ્ણવે શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ વીં ॐ ॐ નમો ભગવતે મહેશ્વરાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ રં ॐ ॐ નમો ભગવતે પુરુષાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ મં ॐ ॐ નમો ભગવતે ઈશ્વરાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ હાં ॐ ॐ નમો ભગવતે સરસ્વત્યૈ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ બિં ॐ ॐ નમો ભગવતે શ્રીયૈ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ ષ્ણું ॐ ॐ નમો ભગવતે ગૌર્યૈ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ જ્વં ॐ ॐ નમો ભગવતે પ્રકૃત્યૈ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ લં ॐ ॐ નમો ભગવતે વિદ્યાયૈ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ તં ॐ ॐ નમો ભગવતે ॐકારાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ સં ॐ ॐ નમો ભગવતે ચતુસૃભ્યોર્ધમાત્રાભ્યઃ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ ર્વં ॐ ॐ નમો ભગવતે વેદેભ્યઃ સાઙ્ગેભ્યઃ સશાખેભ્યઃ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ તોં ॐ ॐ નમો ભગવતે પઞ્ચભ્યો અગ્નિભ્યઃ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ મું ॐ ॐ નમો ભગવતે સપ્તભ્યો વ્યાહૃતિભ્યઃ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ ખં ॐ ॐ નમો ભગવતે અષ્ટભ્યો લોકપાલેભ્યઃ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ નૃ ॐ ॐ નમો ભગવતે અષ્ટભ્યો વસુભ્યઃ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ સિં ॐ ॐ નમો ભગવતે રૂદ્રેભ્યઃ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ હં ॐ ॐ નમો ભગવતે આદિત્યેભ્યઃ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ ભીં ॐ ॐ નમો ભગવતે અષ્ટભ્યો ગ્રહેભ્યઃ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ ષં ॐ ॐ નમો ભગવતે પઞ્ચેભ્યો મહાભૂતેભ્યઃ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ ણં ॐ ॐ નમો ભગવતે કાલાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ ભં ॐ ॐ નમો ભગવતે મનવે શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ દ્રં ॐ ॐ નમો ભગવતે મૃત્યવે શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ મૃં ॐ ॐ નમો ભગવસે યમાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ ત્યું ॐ ॐ નમો ભગવતે અન્તકાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ મૃં ॐ ॐ નમો ભગવતે પ્રાણાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ ત્યું ॐ ॐ નમો ભગવતે સૂર્યાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ નં ॐ ॐ નમો ભગવતે સોમાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ માં ॐ ॐ નમો ભગવતે વિરાટ્ પુરુષાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ મ્યં ॐ ॐ નમો ભગવતે જીવાય શ્રીનૃસિંહાય નમઃ પુષ્પાઞ્જલિં સમર્પયામિ ।
ॐ હં ॐ હં ॐ ॐ નમો ભગવતે સર્વસ્મૈ શ્રીનૃસિંહાય નમઃ પુષ્પાઞ્જલિં સમર્પયામિ ।

અથ મૂલવ્યૂહે ॥

ૐ ઇં હં ઉગ્રાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ૐ ઈં હં વીરાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ૐ ઇં હં મહાવિષ્ણવે શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ૐ ઇં હં જ્વલન્તે શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ૐ ઇં હં સર્વતોમુખાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ૐ ઇં હં ભદ્રાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ૐ ઇં હં મૃત્યુમૃત્યવે શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ૐ ઇં હં નમસ્કાર્યાય શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ।
ૐ હં હં આત્મને શ્રીનૃસિંહાય નમઃ પુષ્પાઞ્જલિં સમર્પયામિ ।
ઇતિ પદાનિ ।

અથ પાદાઃ ॥

ૐ ઇં હં ઉગ્રં-વિષ્ણૂં ઇં હં ૐ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ॥ ૐ ઇં હં જ્વલન્તં -મુખં હં ઇં ૐ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ॥ ૐ ઇં હં નૃસિંહં -ભદ્રં ઇં હં ૐ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ॥ ૐ ઇં હં મૃત્યું -મ્યહં હં હં ઈં ૐ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ॥ ઇતિ પદોપાસ્તિ ॥ ૐ ઇં હં ઉગ્રં -ખમ્ ॥ નૃસિંહં -મ્યહં હં હં ઇં ૐ શ્રીનૃસિંહાય પુષ્પાઞ્જલિં સમર્પયામિ ॥ એવં વ્યૂહદ્વયે ચ પુષ્પાઞ્જલિં પ્રકલ્પયેત્ ॥

અથ ઉત્તરતાપિનિયોક્ત મન્ત્રૈઃ મૂલવ્યૂહે માલાત્રયં સમર્પયેત્ ॥

ૐ અં હં સાત્મકાય અપામગ્રેસ્તેજસા દીપ્યમાનઃ સ નો મૃત્યોસ્ત્રાયતાં નમો બ્રહ્મણે વિશ્વનાભિઃ ॥ ૐ નમો ભગવતે નૃસિંહાત્મને બ્રહ્મણે વ્યપ્તતમાકારાય સર્વસાક્ષિણે પરમેશ્વરાય સર્વગતાય અદ્વયાય વ્યાપ્તતમાય માયિને ॥ તત્સવિતુઃ ઋક્ ॥ અં ઉગ્રં અ અં વીરં અ અં મહાવિષ્ણું અ અં જ્વલન્તં અ અં સર્વતોમુખં અ અં નૃસિંહં અ અં ભીષણં અ અં ભદ્રં અ અં મૃત્યુમૃત્યું અ અં નમામિ અ અં અહં અ ॥ ૐ તત્સન્નમો બ્રહ્મણે તત્સત્ ૐ નમઃ ॥ ૐ નમો અજરાય અમરાય અમૃતાય અભયાય અશોકાય અમોહાય અનશનાય અપિપાસાય અદ્વૈતાય ૐ હ્રીં હંસઃ સોહં સ્વાહા અં સર્વપ્રકાશકાય કૃત્રિમપૂર્ણાહઙ્કારાય સર્વાય સર્વાન્તરાય સર્વાત્મને અદ્વયાય પ્રકાશપ્રકાશકાય ૐ નમો બ્રહ્મણે અં નમઃ સર્વસંહર્ત્રે સતતમહિમ્ને ॥ અં હં ઉગ્રં વીરં -મ્યહમ્ ॥ ૐ ૐ નમ ઇતિ અનેનોઙ્કારમન્ત્રેણ દેવસ્ય વામબાહુમૂલે વિચિત્રમન્ત્રરચિતાં વિચિત્રમાલા પ્રયચ્છેત્ ॥ ૧॥ ૐ ઉં ઉગ્રં વીરં -મ્યહમ્ ॥ ૐ નમો ભગવતે નૃસિંહાત્મને બ્રહ્મણે વિષ્ણવે સર્વોત્કૃષ્ટતમોઙ્કારાય પરમાર્થસત્યસ્વરૂપાય સ્વપ્રકાશાય અસઙ્ગાય અનન્યદર્શિને અદ્વયાય ઉત્કૃષ્ટાય ॥ નારાયણાય વિદ્મહે વાસુદેવાય ધીમહિ ॥ તન્નો વિષ્ણુઃ પ્રચોદયાત્ ॥ ઉં ઉગ્રં ઉ । ઉં વીરં ઉ । ઉં મહાવિષ્ણું ઉ । ઉં જ્વલન્તં ઉ । ઉં સર્વતોમુખં ઉ । ઉં નૃસિહં ઉ । ઉં ભીષણં ઉ । ઉં ભદ્રં ઉ । ઉં મૃત્યુમૃત્યું ઉ । ઉં નમામિ ઉ । ઉં અહં ઉ ॥

ૐ નમો ભગવતે વાસુદેવાય ૐ નમઃ ॥

ઉં ઉત્કૃષ્ટાય ઉદુત્પાદકાય ઉદુત્પ્રવેષ્ટ્ર ઉત્થાપયિત્રે ઉદ્રષ્ટ્રે ઉત્કર્જે ઉત્પથવારકાય ઉદ્વંસનાય ઉદુદ્ભ્રાન્તકાય ઉદુત્તીર્ણવિકૃત્તયે ॥ ૐ નમો નારાયણાય ઉં સર્વનિર્ણાયકાય અકૃત્રિમપૂર્ણોન્મેષોકારાય ॥ ૐ નમો વિષ્ણવે ઉં નમઃ સર્વ વિચિકિત્સાનિરાસકપૂર્ણોન્ચેષમહિમ્ને હરિઃ ॥ ઉગ્રં વીરં -હમ્ ॥ ઉં ૐ નમ ઇતિ અનેનોઙ્કારમન્ત્રેણ ભગવતઃ કણ્ઠે આપાદલમ્બિનીં માલાં દદ્યાત્ ॥ ૨॥ ૐ ત્ર્યમ્બકં ઋક્ ॥ ૐ નમો ભગવતે નૃસિંહાત્મને પરબ્રહ્મણે દેવાય રુદ્રાય મહાવિભૂતિમર્કરાય મહાત્મને અભિન્નરૂપાય સ્વપ્રકાશાય પ્રત્યક્બ્રહ્મણે વ્યાપ્તતમાય ઉત્કૃષ્ટતમાય સર્વપ્રત્યક્કમાય સર્વજ્ઞાય મહામાયાવિભૂતયે ॥ તત્પુરુષાય વિદ્મહે ઋક્ ॥ મં ઉગ્રં મઃ ॥

મં વીરં મઃ ।

મં મહાવિષ્ણું મઃ । મં જ્વલન્તં મઃ । મં સર્વતોમુખં મઃ । મં નૃસિંહં મઃ । મં ભીષણં મઃ । મં ભદ્રં મઃ । મં મૃત્યુમૃત્યું મઃ । મં નમામિ મઃ । મં અહં મઃ ॥ ૐ હ્રીં હ્રૌં નમઃ શિવાય હંસઃ સોહં ૐ નમો ભગવતે મહસેમાનાય મુક્તાય મહાદેવાય મહેશ્વરાય મહાસતે મહાચિત્તે મહાનન્દાય મહાપ્રભવે ૐ હ્રીં હ્રૌં નમઃ શિવાય મં સર્વમહતે બ્રહ્મમલઙ્કારાય સર્વજગન્મયાય સચ્ચિદાનન્દરૂપાય વાઙ્મનોગોચરાતીતાય આનન્દાનુભવસ્વરૂપાય અન્ત્યપ્રકાશાય ॥ ૐ નમઃ શિવાય મં નમઃ સર્વમનોદ્રષ્ટ્રે સર્વનિર્વાહકાય સર્વપ્રત્યૂહકાય સર્વસમ્પીડકાય સર્વ સઞ્જ્વાલકાય સર્વભક્ષકાય સ્વાત્મરૂપદાત્રેત્યુગ્રાયાતિવીરાયાતિમહાવિષ્ણવેતિજ્વલતેતિ સર્વતોમુખાયાતિ નૃસિંહાયાતિ ભીષણાયાતિ ભદ્રાયાતિ મૃત્યુમૃત્યવેતિ નમામિ નેત્યહઙ્કારાય સ્વમહિમસ્થાય હરઃ । ઉગ્રં-હમ્ ॥ મં ૐ નમ ઇતિ અનેન મકારમન્ત્રેણ ભગવતો દક્ષિણબાહુમૂલે માલાં પ્રયચ્છેત્ ॥ ૩॥ ઇતિ મૂલવ્યૂહે માલાત્રયં સમર્પ્ય દ્વાત્રિંશન્નમસ્કારમન્ત્રાઃ ॥ તથા હિ ॥ ૐ ઇં હં ઉગ્રં શ્રીનૃસિંહ નમામ્યહમ્ ॥ ૐ ઇં હં વીરં શ્રીનૃસિંહં નમામ્યહમ્ ॥ ૐ ઇં હં મહાવિષ્ણું શ્રીનૃસિંહં નમામ્યહમ્ ॥ ૐ ઇં હં જ્વલન્તં શ્રીરનૃસિંહં નમામ્યહમ્ ॥ ૐ ઇં હં સર્વતોમુખં શ્રીનૃસિંહં નમામ્યહમ્ ॥ ૐ ઇં હં નૃસિંહં નમામ્યહમ્ ॥ ૐ ઇં હં ભીષણં શ્રીનૃસિંહં નમામ્યહમ્ ॥ ૐ ઇં હં ભદ્રં શ્રીનૃસિંહં નમામ્યહમ્ ॥ ૐ ઇં હં મૃત્યમૃત્યું શ્રીનૃસિંહં નમામ્યહમ્ ॥ ૐ ઇં હં નમામિ શ્રીનૃસિંહં નમામ્યહમ્ ॥ ૐ ઇં હં અહં શ્રીનૃસિંહં નમામ્યહમ્ ॥

અથ પાદ ॥

ૐ ઇં હં ઉગ્રં -ષ્ણું -શ્રીનૃસિંહં નમામ્યહમ્ ॥ ૐ ઇં હં જ્વલન્તં -ખં શ્રીનૃસિંહં નમામ્યહમ્ ॥ ૐ ઇં હં નૃસિંહં -દ્રં શ્રીનૃસિંહં નમામ્યહમ્ ॥ ૐ ઇં હં મૃત્યુ -અહં શ્રીનૃસિંહં નમામ્યહમ્ ॥ અથ સમગ્રમ્ ॥ ૐ ઇં હં ઉગ્રં -મ્યહં ઇં હં ૐ શ્રીનૃસિંહં નમામ્યહમ્ ॥ ઇતિ ષોડશ ॥ એવં બ્રહ્માદિ દ્વાત્રિંશ-દ્વ્યૂહાત્મકં ષોડશ નમસ્કારાઃ ॥ યથા ॥ ૐ ઇં હં ઉગ્રં ૐ બ્રહ્માદિ દ્વત્રિશન્દ્વ્યૂહાત્મકં શ્રીનૃસિંહાય નમઃ ॥ એવં સર્વત્ર ॥ ૐ ઇં હં વીરં ૐ બ્રહ્માદિ દ્વાત્રિંશદ્વ્યૂહાત્મકં શ્રીનૃસિંહાય નમઃ ॥ ૐ ઇં હં મહાવિરષ્ણું ૐ બ્રહ્માદિ દ્વાત્રિશ ॥ ૐ ઇં હં જ્વલન્તં ૐ બ્રહ્માદિ. ॥ ૐ ઇં હં સર્વતોમુખં ૐ બ્રહ્માદિ. ॥ ૐ ઇં હં નૃસિંહં ૐ બ્રહ્માદિ દ્વા. ॥ ૐ ભીષણં ૐ બ્રહ્માન્દિ ॥ ૐ ઇં હં ભદ્રં ૐ બ્રહ્માદિ દ્વા॥। ૐ ઇં મૃત્યુમૃત્યું ૐ બ્રહ્માદિ ॥ ૐ ઇં હં નમામિ ૐ બ્રહ્માદિ દ્વા. ॥ ૐ ઇં હં અહં ૐ બ્રહ્માદિ દ્વાત્રિંશવ્યૂહાત્મકં શ્રીનૃસિંહાય નમામિ ॥ ઇતિ પાદોસ્તિ ॥ ૐ ઇં હં ઉગ્રં ષ્ણું ૐ બ્રહ્માદિ ॥ ૐ ઇં હં જ્વલં -ખં ૐ બ્રહ્માદિ ॥ ૐ ઇં હં નૃસિં -દ્રં ૐ બ્રહ્માદિ ॥ ૐ ઇં હં મૃત્યુ -હં ૐ બ્રહ્માદિ ॥ ઇતિ પોદોપાસ્તિ ॥ ૐ ઇં હં ઉગ્રં -હં ઇં ૐ ૐ બ્રહ્માદિ દ્વાત્રિંશદ્વ્યૂહાત્મકં શ્રીનૃસિંહં નમામ્યહમ્

॥ ઇતિ દ્વાત્રિંશન્નમસ્કારમન્ત્રાઃ ॥

અથ પઞ્ચવ્યૂહ અવિલમ્બેન શ્રીનૃસિંહસાક્ષાત્કારિણી શ્રૌતસ્તુતી વિદધીત ॥

ઈશાનાદિ દિગ્દલક્રમેણ ॥ તથા હિ ॥ યો વૈત્યાદિ દ્વાત્રિંશન્મન્ત્રાણાં બ્રહ્મા ઋષિઃ ॥ નાના છન્દાસિ ॥ શ્રીનૃસિંહો દેવતા ॥ શ્રીનૃસિંહપ્રીત્યૈ સ્તવને વિનિયોગઃ ॥ ૐ ઉં ૐ ૐ યો વૈ નૃસિંહોદેવો ભગવાન્યશ્ચ બ્રહ્મા તસ્મૈ વૈ નમોનમઃ ॥ ૐ ગ્રં ૐ ૐ યો વૈ નૃસિંહો દેવો ભગવાન્યશ્ચ વિષ્ણુસ્તમૈ વૈ નમોનમઃ ॥ ૐ વિં ૐ ૐ યો વૈ નૃસિંહો દેવો ભગવાન્યશ્ચ મહેશ્વરસ્તમૈ વૈ નમોનમઃ ॥ ૐ રં ૐ ૐ યો વૈ નૃસિંહો દેવો ભગવાન્ યશ્ચ પુરુષસ્તસ્મૈ વૈ નમોનમઃ ॥ ૐ મં ૐ ૐ યો વૈ નૃસિંહો દેવો ભગવાન્યશ્ચ વિશ્વેશ્વરસ્તસ્મૈ વૈ નમોનમઃ ॥ ૐ હાં ૐ ૐ યો વૈ ભગવાન્યા સરસ્વતી તસ્મૈ વૈ નમોનમઃ ॥ ૐ વિં ૐ ૐ યો વૈ નૃ. ન્યા શ્રીસ્તસ્મૈ. - ॥ ૐ ષ્ણું ૐ ૐ યો વૈ નૃ. ન્યા ગૌરી તસ્મૈ ॥ ૐ જ્વં ૐ ૐ યો વૈ -ન યા પ્રકૃતિસ્તસ્મૈ ॥ ૐ લં ૐ ૐ યો વૈ નૃ.-ન્ યા વિદ્યાસ્તસ્મૈ વૈ ॥ ૐ તં ૐ ૐ યો વૈ નૃ -ન્ યશ્ચ ઓઙ્કારસ્તસ્મૈ વૈ નમોનમઃ ॥ ૐ સં ૐ ૐ યો વૈ નૃ । -ન્ યાઃ ચતુસ્રૌર્ધમાત્રાસ્તસ્મૈ વૈ. ॥ ૐ ર્વં ૐ ૐ યો વૈ નૃ. -ન્ યે વેદાઃ સાઙ્ગાઃ સશાખાઃ તસ્મૈ વૈ - ॥ ૐ તોં ૐ ૐ યો વૈ નૃ. -ન્ યે ચ પઞ્ચાગ્નયસ્તસ્મૈ ॥ ૐ મું ૐ ૐ યો વૈ નૃ -ન્ યાઃ સપ્તવ્યાહૃતયસ્તસ્મૈ ॥ ૐ ખં ૐ ૐ યો વૈ નૃન્ યે ચાષ્ટૌ લોકપાલાઃ તસ્મૈ - ॥ ૐ નૃ ૐ ૐ યો વૈ નૃ-ન્ યે ચાષ્ટૌ વસવસ્તસ્મૈ - ॥ ૐ સિં ૐ ૐ યો વૈ નૃ-ન્ યે ચ રુદ્રાસ્તસ્મૈ વૈ નમોનમઃ ॥ ૐ હં ૐ ૐ યો વૈ નૃ-ન્ યે ચાદિત્યાસ્તસ્મૈ ॥ ૐ ભીં ૐ ૐ યો વૈ નૃ-ન્ યે ચાષ્ટૌ ગ્રહાસ્તસ્મૈ ॥ ૐ ષં ૐ ૐ યો વૈ નૃ -ન્ યાનિ પઞ્ચમહાભૂતાનિતસ્મૈ - ॥ ૐ ણં યો વૈ નૃ-ન્ યશ્ચ કાલસ્તસ્મૈ ॥ ૐ ભં ૐ ૐ યો વૈ નૃ-ન્ યશ્ચ મનુસ્તસ્મૈ ॥ ૐ દ્રં ૐ ૐ યો વૈ નૃ -ન્ યશ્ચ મૃત્યુસ્તસ્મૈ - ॥ ૐ મૃં ૐ ૐ યો વૈ નૃ-નં યશ્ચ યમસ્તસ્મૈ । ૐ ત્યું ૐ ૐ યો વૈ નૃ-ન્ યશ્ચ આન્તકસ્તસ્મૈ ॥ ૐ મૃં ૐ ૐ યો વૈ નૃ-ન્ યશ્ચ પ્રાણસ્તસ્મૈ । ત્રૐ ત્યું યો વૈ નૃ -ન્ યશ્ચ સૂર્યસ્તસ્મૈ ॥ ૐ નં ૐ ૐ યો વૈ નૃ -ન્ યશ્ચ સોમસ્તસ્મૈ ॥ ૐ માં ૐ ૐ યો વૈ નૃ -ન્ યશ્ચ વિરાટ્ પુરુષસ્તસ્મૈ ॥ ૐ મ્યં ૐ ૐ યો વૈ નૃ-ન્ યશ્ચ જીવસ્તસ્મૈ ॥ ૐ હં ૐ ૐ યો વૈ નૃસિંહો દેવો ભગવાન્યશ્ચ સર્વં તસ્મૈ વૈ નમોનમઃ ॥

અસ્યાસ્તુતેર્માહાત્મ્યં ભગવાન્ શ્રીનૃસિંહૈકવેદ્યમ્ ॥

સુકૃત્પુરશ્ચરણો મહાવિષ્ણુર્ભવતિ મહાવિષ્ણુ ર્ભવતીતિ દ્વિરાવૃત્યાં શ્રુતિઃ ॥ અથાભેદસ્ય પ્રતિપત્તયે સચ્ચિદાનન્દાનન્તાત્મપદપૂર્વા સ્તુતિમન્ત્રા ॥ તચ્ચેત્થમ્ ॥ ૐ ઉગ્રં સચ્ચિદાનન્દપૂર્ણ પ્રત્યક્ સદાત્માનં નૃસિંહં પરમાત્માનં પરં બ્રહ્માહં નમામિ ॥ ૐ વીરં સચ્ચિદાનન્દપૂર્ણં પ્રત્યક્સદાત્માનં નૃસિંહં પરમાત્માનં પરં બ્રહ્માહં નમામિ ॥ ૐ મહાવિષ્ણું સચ્ચિદાનન્દપૂર્ણં પ્રત્યક્સદાત્માનં નૃસિંહં પરમાત્માનં પરં બ્રહ્માહં નમામિ ॥ ૐ જ્વલન્તં સચ્ચિદાનન્દ પ્રત્યાનચિન્દા - ॥ ૐ સર્વતોમુખં સચ્ચિદાનન્દ -ૐ નૃસિંહં સચ્ચિદાનન્દ - ॥ ૐ ભીષણં સચ્ચિદાનન્દ- ॥ ૐ ભદ્રં સચ્ચિદનન્દ ॥ ૐ મૃત્યુમૃત્યું સચ્ચિદાનન્દપૂર્ણં પ્રત્યક્સદાત્માનં નૃસિંહં પરમાત્માનં પરં બ્રહ્માહં નમામિ ॥ ઇતિ સન્મત્રનવકમ્ ॥ અર્થાચન્નવકં ૐ ઉગ્રં સચ્ચિદાનન્દ પ્રત્યક્ ચિદાત્માનં નૃસિંહં પરમાત્માનં પરં બ્રહ્માહં નમામિ ॥ ૐ વીરં સચ્ચિદાનન્દ -પ્રત્યક્ ચિદાત્માનં. - ॥ ૐ મહાવિષ્ણું સચ્ચિદાનન્દ-પ્રત્યક્ ચિદાત્માનં - ॥ ૐ જ્વલન્તં સચ્ચિદાનન્દ-પ્રત્યક્ ચિદાત્માનં. ॥ ૐ સર્વતોમુખં સચ્ચિદાનન્દ - ॥ ૐ નૃસિંહં સચ્ચિદાનન્દ - ॥ ૐ ભીષણં સચ્ચિદાનન્દ - ॥ ૐ ભદ્રં સચ્ચિદાનન્દ - ॥ ૐ મૃત્યુમૃત્યું સચ્ચિદાનન્દપૂર્ણં

પ્રત્યક્ ચિદાત્માનં નૃસિંહં પરમાત્માનં પરં બ્રહ્માહં નમામિ ॥ ઇતિ ચિન્મન્ત્રનવકમ્ ॥ અથાનન્દમન્ત્રનવકમ્ ॥ ૐ ઉગ્રં સચ્ચિદાનન્દપૂર્ણં પ્રત્યકાનન્દાત્માનં નૃસિંહં પરમાત્માનં પરં બ્રહ્માહં નમામીતિ પ્રતિપદં પઠેત્ ॥ વીરં ૨ મહાવિષ્ણું ૩ જ્વલન્તં ૪ સર્વતોમુખં ૫ નૃસિંહં ૬ ભીષણં ૭ ભદ્રં ૮ મૃત્યુમૃત્યું ૯ ઇત્યાનન્દભન્ત્રનવકમ્ ॥

અથાનન્તમન્ત્રનવકમ્ ॥ ૐ ઉગ્રં સચ્ચિદાનન્દપૂર્ણં પ્રત્યગાનન્તમાનં નૃસિંહં પરમાત્માનં પરં બ્રહ્માહં નમામિ ॥ ઇતિ પ્રતિપદં પઠેત્ ॥ એવં સર્વત્ર ॥ વીરં ૨ મહાવિષ્ણું ૩ જ્વલન્તં ૪ સર્વતોમુખં ૫ નૃસિંહં ૬ ભીષણં ૭ ભદ્રં ૮ મૃત્યુમૃત્યું ૯ ઇત્યાનન્તમન્ત્રનવકમ્ ॥ અથાત્મમન્ત્રનવકમ્ ॥ ૐ ઉગ્રં સચ્ચિદાનન્દપૂર્ણં પ્રત્યગાત્માનં નૃસિંહં પરમાત્માનં પરં બ્રહ્માહં નમામિ ॥ ઇતિ પ્રતિપદં પઠેત્ ॥ વીરં ૨ મહાવિષ્ણું ૩ જ્વલન્તં ૪ સર્વતોમુખં ૫ નૃસિંહં ૬ ભીષણં ૭ ભદ્રં ૮ મૃત્યુમૃત્યું ૯॥ ઇત્યાત્મમન્ત્રનવકમ્ ॥ ઇતિ પઞ્ચચત્વારિંશત્ સ્તુતિમન્ત્રાઃ ॥ એવં શ્રીનૃસિંહમહરહસ્તુવીત । અથાશક્તપક્ષે ॥ ૐ ઈ હં ઉગ્રં હં હં ઈ ૐ સચ્ચિદાનન્દપૂર્ણં પ્રત્યક્સચ્ચિદાનન્દાનન્તાત્માનં શ્રીનૃસિંહં પરમાત્માનં પરં બ્રહ્માહં નમામિ ॥ ઇત્યેવમગ્રેણ ચ એવં સચ્ચિદાનન્દાનન્તાત્મપદૈર્મૂલમન્ત્રસ્ય એકાદશભિઃ પદૈઃ ચતુર્ભિઃ પાદૈઃ સમગ્રેણ ચ એવં ષોડશસ્તુતિમન્ત્રાઃ ॥ એવં દેવમહરહસ્તુવીત ॥ ઇતિ પુરશ્ચરણોપાસના ॥ અનયા પુરશ્ચરણોપાસનયા શ્રીનૃસિંહં સન્તુષ્ટમભિમુખીકૃત્ય ॥ અથ પ્રધાનોપાસનામારભેત્ ॥ પૂર્વવત્ ૐ ઇં હં ઉગ્રં શ્રીનૃસિંહં નમામ્યહમ્ ॥ એવં પ્રણવશક્તિબીજપૂર્વકં વીરાદિ દશપદૈશ્ચતુર્ભિઃ પાદૈઃ સમગ્રેણ ચ ષોડશ નમસ્કારાન્વિધાય ॥ આપાદતલમૂર્ધ્યન્તં શ્રીનૃસિંહં માનસ્તોષં ધ્યાત્વા ॥ પૂજાપરઃ સરમાસનાદ્યુપચ્ચારાન્મનસા વ્યુહદ્રયાય પ્રકલ્પયેત્ ॥

બ્રહ્મકન્દસમુદ્ભૂતં જ્ઞાનાનલસમાન્વિતં ઐશ્વર્યાષ્ટદલોપેતં પરં વૈરાગ્યકર્ણિકમ્ ॥ ૧॥ તસ્મિન્પીઠે ચિદાત્માનં શ્રીનૃસિંહં સ્વરૂપિણમ્ । પઞ્ચવર્ણાત્મકાશક્તિ વિદ્વાંસઃ સમુદાહૃતા ॥ ૨॥ નાદરૂપ શિવે ષષ્ઠે સંહૃત્યાત્માનુચિન્તનમ્ । ઉભયોરૈક્યચ્ચિતા ચ તદ્ભવાન્તકમાન્તરમ્ ॥ ૩॥ માનસાર્ચિતૈર્દ્રવ્યૈશ્ચન્દમાદ્યૈર્મનોહરૈઃ । અર્ચયેદ્દેવદેવેશમાન્તરં તદ્દ્વિતીયકમ્ ॥ ૪॥ આન્તરં દ્વિવિધં પ્રોક્તં ન્યાસાનામિહ યોગિનામ્ ॥ અન્યેષાં તુ સમાખ્યાતં બાહ્યમાભ્યન્તરં ખલુ ॥ ૫॥ માનસૈઃ કુસુમૈરર્ચા સાત્વિકી સા શુભા મતા । અનિર્માલ્યા પરાશુત્વાત્ મોક્ષદા સિદ્ધિદા શુભા ॥ ૬॥ તસ્માત્સર્વપ્રયત્નેન માનસં યજનં ધ્રુવમ્ । આદાવેવ પ્રકર્તવ્યં પશ્ચાદ્દ્રવ્યૈઃ સુવિસ્તરઃ ॥ ૭॥ તચ્ચેત્થમ્ ॥

પરમેશ્વરાય પઞ્ચોપચારાન્કુર્યાત્ ॥ લં પૃથિવ્યાત્મને ગન્ધતન્માત્રાય પ્રકૃત્યાનન્દાત્મને ઘ્રાણેં -દ્રિયાત્મને શ્રીનૃસિંહાય ગન્ધં કલ્પયામિ ॥ હં આકાશાત્મને શબ્દતન્માત્રાય પ્રકૃત્યાનન્દાત્મને શ્રોત્રેન્દ્રિયાત્મને શ્રીનૃસિંહાય પુષ્પં કલ્પયામિ ॥ યં વાયવ્યાત્મને સ્પર્શતન્માત્રાય પ્રકૃત્યાનન્દાત્મને ત્વગિન્દ્રિયાત્મને શ્રીનૃસિંહાય ધૂપં કલ્પયામિ ॥ રં અગ્ન્યાત્મને રૂપતન્માત્રાય પ્રકૃત્યાનન્દાત્મને ચક્ષુરિન્દ્રયાત્મને શ્રીનૃસિંહાય દીપં કલ્પયામિ ॥ વં જલાત્મને રસતન્માત્રાય પ્રકૃત્યાનન્દાત્મને રસનેન્દ્રિયાત્મને શ્રીનૃસિંહાય ષડ્રસોપેતં નૈવેદ્યં કલ્પયામિ ॥ અનયા પૂજયા શ્રીનૃસિંહઃ પ્રીયતામ્ ॥ એવં પઞ્ચોપચારાન્વિધાય હોમં કુર્યાત્ ॥ આધારકુણ્ડે ચિદગ્નૌ પ્રણવદીપ્તે એકવારોચ્ચારણેન સ્વાહાન્તેન પ્રણવેન સહપ્રપઞ્ચેન જુહુયાત્ ॥ ૐ પ્રપઞ્ચાય સ્વાહા ॥ ઇત્યાન્તરં હોમં વિધાય ॥ મનસૈવ પ્રદક્ષિણીકૃત્ય દણ્ડવન્નમસ્કૃત્વા પ્રાર્થયેત્ ॥ સાધુ વાસાધુ વા કર્મ યદ્યાચરિતં મયા ॥ તત્સત્વેન ગૃહાણાત્ર કૃપયા જગદીશ્વર ॥ ૧॥ પૂજાહોમાદિકં દેવ યત્કૃતં ત્વદનુગ્રહાત્ । તેન સત્કર્મણા દેવ પ્રીતો ભવ

જગત્પતે ॥ ૨॥ શ્રીનૃસિંહાય શાન્તાય સગણાયાદિહેતવે ॥ નિવેદયામિ ત્વાત્માનં ત્વં ગતિઃ પરમેશ્વર ॥ ૩॥ ઇત્યાત્માનં તેજોમયં શ્વાસમાર્ગેણાગતં ચુલુકોદકેન સાક્ષસ- પુષ્પેણ દેવસ્ય દક્ષિણહસ્તે નિવેદયેત્ ॥ સર્વમાત્મીયમાત્માનં ચ દેવાય સમર્પ્ય ॥ સ્વયં સર્વકારણમહાવિષ્ણુરૂપેણ પૂર્ણસચ્ચિદાનન્દબ્રહ્મરૂપેણ વા કિયન્તં કાલમવતિષ્ઠેત્ ॥ અચ્યુતોઽહમનન્તોઽહં ગોવિન્દોઽહમહં હરિઃ ॥ આનન્દોઽહમશેષોઽહમજોઽહમમૃતોઽસ્મ્યહમ્ ॥ ૧॥ નિત્યોહં નિર્વિકલ્પોહં નિરાકારોઽહમદ્વયઃ ॥ સચ્ચિદાનન્દપૂર્ણોહં નિત્યમુક્તઃ સ્વભાવવાન્ ॥ ૨॥ અક્ષરોઽહમચિન્ત્યોઽહમક્ષ્યોઽહમદોષભાક્ । બ્રહ્મૈવાહં ન સંસારી મુક્તોઽહમિતિ ભાવયેત્ ॥ ૩॥ ઇત્યાત્માનં પરિભાવ્ય ॥ સિંહમુખમુદ્રામભિમુખીકૃત્ય દ્વાત્રિંશન્મુદ્રાઃ પ્રદર્શયેત્ ॥ અઞ્જલિ ૧ ર્વંદનં ૨ મુષ્ટિઃ ૩ પ્રધાનં ચ ૪ ચપેટિકા ૫ તર્જન્યાસ્ફોટનં તદ્વત્ ૬ શઙ્ખ ૭ ચક્ર ૮ ગદા ૯ અક ૧૦ પાશાં ૧૧ કુશૌ ચ ૧૨ મુસલં ૧૩ ખઙ્ગ ૧૪ ચર્મ ૧૫ સુશાઙ્ગુ ૧૬ ઇષુ ૧૭ શ્વાત્રં ચ ૧૮ વક્ત્રં ચ ૧૯ દંષ્ટ્રા ૨૦ શ્રીવત્સ ૨૧ કૌસ્તુભં ૨૨ લક્ષ્મી ૨૩ ર્યોનિ ૨૪ સ્તન્ગ્રા ધેનુ ૨૫ ર્વરદા ૨૬ ભયહસ્તકૌ ૨૭ કર્ણૌ ચ ૨૮ કેસરં ચૈવ ૨૯ વનમાલા ૩૦ ખગેશ્વરઃ ૩૧ ઉપસંહાર મુદ્રાં ચ ૩૨ દ્વાત્રિંશત્પરિકીર્તિતાઃ ॥ ઇતિ મુદ્રાઃ પ્રદર્શ્ય ॥

અથ સિંહમુદ્રાલક્ષણમ્ ॥ જાનુમધ્યગતૌ કૃત્વા ચુબુકોષ્ઠૌ સમાવૃતૌ ॥ હસ્તૌ તુ ભૂમિસંલગ્નૌ કમ્પમાનઃ પુનઃ મુનઃ । મુખં વિવૃત્તકં કુર્યાલ્લલજિહ્વા સુલેલિહા ॥ એષા મુદ્રા નારસિંહી પ્રધાને પરિકીર્તિતા ॥ તતઃ પૂર્વવત્ દ્વિસ્વરમાનુષ્ટુભં સાઙ્ગં સામ ગીત્વા સપરિકર ભૂર્લોકાધાત્મકોઽહમિતિ ભાવયિત્વા ॥ મન્ત્રાર્થં સ્મરન્મન્ત્રદેવતાત્મનૈક્યં સમ્ભાવ્ય ચાતુસ્વરં ગાયેત્ ॥ તદ્યથા ॥ પ્રથમં પ્રણવસામ ॥ તત્ર માત્રાદ્વયં મિલિતં અઙ્ગુષ્ઠેન તર્જનીમધ્યપર્વસ્પર્શં કૃત્વા તતો મધ્યમા તતો અનામિકાત્તતઃ કનિષ્ઠિકામધ્યપર્વસ્પર્શં કૃત્વા ॥ અનુદાત્તપ્રકર્ષેણ ચતુર્ભિઃ સ્વરૈશ્ચતુર્માત્રાયુક્તૈર્ગાયેત્ ॥ તથૈવ પુનસ્તૃતીયમાત્રાપ્રણવશ્ચ દ્વયં મિલિતં ગાયેત્ ॥ ઇતિ ચતુરાવૃત્ત્યાષ્ટાક્ષરતાસમ્પાદનેન પ્રણવસામ ॥ તથૈવ શક્તિબીજે ચતુરાવૃત્યા ગાયેત્ ॥ સર્વત્રાપ્યેવમેવ ક્રમઃ ॥ તતઃ પ્રથમપાદાઙ્ગં પ્રણવં ચ ગાયેત્ ॥ દ્વિતીયપાદાઙ્ગં ઘૃણિ ચ ગાયેત્ ॥ તતસ્તૃતીયપાદાઙ્ગં યજુર્લક્ષ્મીં ચ ગાયેત્ ॥ અત્ર ચાતુઃસ્વરેણ ઘૃણિર્યજુર્લક્ષ્મ્યોરપિ ગાનમિત્યાચાર્યઃ ॥ એવં ચાતુસ્વરં ગીત્વા ॥ ત્વં માલેતિ માલાં પ્રાર્થ્ય ॥ મૂલમન્ત્રસ્ય યથાશક્તિ જપં કૃત્વા તદ્દ્વિગુણં પ્રણવં ચ મૌનેન ગણયેત્ ॥ મૌનં ચ ગુરુવ્યતિરિક્તેન તેનાપિ ચ દેવભાષયાપૃષ્ટપ્રતિવચનાદિરૂપં વક્તવ્યમ્ ॥ એવં જપં વિદધીત પુનઃ ૐ માલેતિ માલાં પ્રાર્થ્ય ॥ તતઃ પૂર્વવત્ દ્વિસ્વરમાનુષ્ટુભં સાઙ્ગં ગીત્વા સ્માર્તરીત્યા પઞ્ચાઙ્ગેન વિસર્જનં ન્યાસં કૃત્વા યથોક્તં લક્ષ્મીનૃસિંહં ધ્યાત્વા ॥ પૂર્વવત્પ્રાણાનાયમ્ય ॥ ગુહ્યાતિગુહ્ય ગોપ્તા ત્વં ગૃહાણાસ્મત્કૃતં જપમ્ ॥ સિદ્ધિર્ભવતુ મે દેવ ત્વત્પ્રસાદાન્નૃકેસરીતિ નિવેદ્ય ॥ યસ્ય સ્મૃત્યા ચ નામોક્ત્યા ॥ ન્યૂનં સમ્પૂર્ણતાં યાતિ । અનેન સ્માર્તશ્રૌતો પાસનાન્તર્યાગેન શ્રીલક્ષ્મીનૃસિંહઃ પ્રીયતાં ન મમેતિ દેવસ્ય દક્ષિણે હસ્તે ચુલુકધારયા ભગવતિ સમર્પયેદિતિ ત્યજેત્ ॥ ઇતઃ પૂર્વં વાક્પ્રાણદેહબુદ્ધિધર્માધિકારતઃ જાગૃત્સ્વપ્ન- સુબુપ્ત્યાવસ્થાસુ મનસા કર્મણા વાચા હસ્તાભ્યાં પદ્ભ્યામુદરેણ શિશ્ના યદુક્તં યત્કૃતં યત્સ્મૃતં તત્સર્વં બ્રહ્માર્પણં ભવતુ સ્વાહા ॥ માં મદીયં ચ સર્વં અસ્મત્સ્વામિને સમ્યગર્પયેત્ ઇતિ બ્રહ્માર્પણં કૃત્વા ॥ ભદ્રં કર્ણેભિર્ ઋક્ ॥ સ્વસ્તિ ન ઇન્દ્રો ઋક્ ॥ ઇતિ શાન્તિ પઠિત્વા નૃસિંહપરો ભવેત્ ॥ ઇતિ શ્રીમલ્લક્ષ્મીનૃસિંહાનુષ્ઠાનનિત્યવિધિઃ સમાપ્તઃ ॥ ઇતિ શ્રીમલ્લક્ષ્મી- નૃસિંહાર્પણમસ્તુ ॥ અથ પુરશ્ચરણાધિકારસિદ્ધ્યર્થં દ્વાત્રિંશત્સહસ્રં જપેત્ ॥ તતઃ પુશ્ચરણસિદ્ધ્યર્થં દ્વાત્રિંશદયુતં જપેત ॥

સઘૃતપાયસેન દશાંશહોમઃ ॥ પરમેશ્વર સાક્ષાત્કારસિદ્ધ્યર્થં દ્વાત્રિંશલક્ષં જપેત્ ॥ નિગ્રહાનુગ્રહસમર્થો ભવતિ ॥ અથ સદાશિવાત્મકં શ્રીનૃસિંહધ્યાનમુચ્યતે ॥ ૐ પઞ્ચવક્ત્રં મહાભીમં કાલાનલસમપ્રભમ્ । રુણ્ડમાલાધરં રૌદ્રં કણ્ઠહારેણ શોભિતમ્ ॥ ૧॥ નાગયજ્ઞોપવીતં ચ સર્વાલઙ્કારભૂષિતમ્ । ચન્દ્રમૌલિનીલકણ્ઠં પ્રતિવક્ત્રં ત્રિનેત્રકં ॥ ૨॥ ભુજૈઃ પરિઘસઙ્કાશૈર્દશભિશ્ચોપસેવિતમ્ । અક્ષસૂત્રગદાપદ્મં શઙ્ખં ગોક્ષીરસન્નિભમ્ ॥ ૩॥ ધનુશ્ચ મુસલં ચૈવ તથા ચક્રેણ મણ્ડિતમ્ । ખડ્ગં શૂલં ચ બાણં ચ નૃસિંહં રુદ્રરૂપિણમ્ ॥ ૪॥ ઇન્દ્રં ગોપકનીલાભં ચન્દ્રાભં સ્વર્ણસન્નિભમ્ । પૂર્વાદિ ચોત્તરાન્તાસ્યં સ્વોર્ધ્વાસ્યં સર્વવર્ણકમ્ ॥ ૫॥ એવં રૂપં હરિં ધ્યાયેત્સર્વસઙ્કષ્ટગતેઽપિ ચ । ઇદં મૃત્યુહરં ધ્યાનં સ્મરણાત્ સર્વસિદ્ધિદં ॥ ૬॥ ઇદં સદાશિવાત્મકનૃસિંહધ્યાનમ્ ॥ ૬॥

અથ મહાકર્મણિ નૃસિહં ધ્યાનમુચ્યતે ॥ ધ્યેયો યદા મહાકર્મ તદ્વા ષોડશહસ્તવાન્ । નૃસિંહઃ સર્વલોકેશઃ સર્વાભરણભૂષિતઃ ॥ ૧॥ દ્વૌ વિદારણકર્માણૌ દ્વૌ ચાન્ત્રોદ્ધરણૌ ધૃતૌ । ચક્રશઙ્ખધરૌ તુદ્વૌ ચ બાણધનુર્ધરૌ ॥ ૨॥ ખડ્ડ્ઘખેટધરૌ દ્વૌ ચ દ્વૌ ગદાપદ્મધારિણૌ । પાશાઙ્કુશધરૌ દ્વૌ ચ દ્વૌ રિપોર્મુકુટાર્પિતૌ ॥ ૩॥ ઇતિ ષોડશદોદણ્ડમણ્ડિતં નૃહરિં વિભુમ્ । ધ્યાયેન્નીરદનીલાભં ઉગ્રકર્મણ્યનન્યધીઃ ॥ ૪॥ ધ્યેયો મહત્તમે કાર્યે ષોડશદ્વય- હસ્તવાન્ । નૃહરિઃ સર્વભૂતાદ્યઃ સર્વસિદ્ધિકરઃ પ્રભુઃ ॥ ૫॥ દક્ષિણે ચક્રપદ્મે ચ પરશું પાશમેવ ચ । હસ્તં ચ મુસલં ચૈવમભયં ચાઙ્કુશં તથા ॥ ૬॥ પટ્ટિશં ભિણ્ડિપાલં ચ ખેટમુદ્ગરતો મદાન્ । વામભાગે કરૈઃ શઙ્ખખડ્ગપાશં ચ શૂલકમ્ ॥ ૭॥ અગ્નિ ચ વરદં શૂલં શક્તિં કાં ચ તતઃપરમ્ । કાર્મુકં તર્જનીમુદ્રાં ગદાં ડમરુસર્પકૌ ॥ ૮॥ દ્વાભ્યાં કરાભ્યાં ચ રિપોર્જાનુમસ્તકપીડનમ્ । તતોર્ધ્વકૃતહસ્તાભ્યાં આન્ત્રમાલાધરં હરિમ્ ॥ ૯॥ અધસ્થિતાભ્યાં બાહુભ્યાં હિરણ્યકવિદારણમ્ । પ્રિયં કરં ચ ભક્તાનાં દૈત્યાનાં ચ ભયઙ્કરમ્ ॥ ૧૦॥ નૃસિંહં સંસ્મરેદિત્થં મહામૃત્યુભયાપહમ્ ॥ ૬॥

અથ રોગવિષમૃત્યુશત્રુભયહરહરિધ્યાનમુચ્યતે ॥ સુવર્ણાદ્યાભેસુપર્ણે સ્થિતમતિસુમુખં કોટિપૂર્ણેદુવક્ત્રં વિદ્યુન્માલા સટાસિન્ત્રિશિખમયદૃશં પીતવસ્ત્રોરુભૂષમ્ । હસ્તોદ્યચ્ચક્રશઙ્ખાભયધરમાલિક્ષ્વેડરોગાદિમૃત્યુઊતૈર્ધ્યા- નૈઃર્ધ્વસયન્તં સુખૃતમનિશં શ્રીયુતં શ્રીનૃસિંહમ્ ॥ ૧॥ ઇતિ ધ્યાનં સમાપ્તમ્ ॥ શ્રીનૃસિંહ જયજય શ્રીનૃસિંહ ॥ ઇતિ શ્રીમલ્લક્ષ્મીનૃસિંહાર્પણમસ્તુ ॥ ૬॥ શ્રીસામરાજલક્ષ્મીનૃસિંહાર્પણમસ્તુ ॥ નરહરિ ॥ ૐ તત્ સત્ ।

ઇતિ નૃસિંહસામાનુષ્ઠાન ।

A note of caution or disclaimer:
The text here is given for
academic purpose, for information, only as it
appears in a book. Considered as a tantric text,
esoteric in nature, readers are advised caution
about its indiscriminate usage or application of
the same. It is very clear that a guru's
guidance is always essential for mantra

practices and practicing without the same
leads to no merit or can in fact backfire.

Proofread by Manoj Kumar Barman

---

*Nrisimha Samanushthana*

pdf was typeset on August 11, 2025

Please send corrections to *sanskrit@cheerful.com*